क्रम सं०

प्रवेश सं० 40389

विषय: पुराणेतिहास,

नाम रामनाम माला

ग्रन्थकार

पत्र सं० १-५

अक्षर सं० (पंक्तौ) 38 पंक्ति सं० (पृष्ठे) 10

श्लोक सं०

लिपि: दे.ना.

आधार: का.

प्राप्ति ११.६.४५.

सं. १८२५

वि० अवस्था श्र.

14275 नं. ८३८

Indira Gandhi National
Centre for the Arts

रामनाममाहात्म्यवाक्यसंग्रह ४८

बालमुकुंदस्येदं

Indira Gandhi National
Centre for the Arts

१ ॐ श्रीगणेशाय नमः श्रीहनुमन्नाटके कल्याणानां निधानं कलिमलमथनं पावनं पाव
नानां पाथेयं यन्मुमुक्षोः सपदि परपदप्राप्तये प्रस्थितस्य विश्रामस्थानमेकं कविवरवच
सां जीवनं सज्जनानां बीजं धर्मद्रुमस्य प्रभवतु भवतां भूतये रामनाम १ महाशंभुसं
हितायां मुक्तिस्त्रीकर्णपूरौ मुनिहृदयवयःपक्षती तीरभूमी संसारापारसिंधोः कलिक
लुषतमस्तोमसोमार्कबिंबौ उन्मीलत्पुण्यपुंजद्रुमललितदले लोचने च श्रुतीनां काम
रामेति वर्णौ शमिह कलयतां संततं सज्जनानां २ स्कंदपुराणे रामनामैव नामैव नामैव
मम जीवनं कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ३ अवशेनापि यन्नाम्नि की
र्तिते संस्मृतेऽपि वा विमुक्तपातकः सोऽपि परं पदमवाप्नुयात् ४ पद्मपुराणे नामचिंताम
णी रामश्चैतन्यपरविग्रहः पूर्णः शुद्धो नित्ययुक्तो नभिन्नं नामनामिनः ५ अतः श्रीरामना १
मादि न भवेद्ग्राह्यमिंद्रियैः स्फुरति स्वयमेवैतज्जिह्वादौ श्रवणे मुखे ६ अपराधविनिर्मुक्तो

नाम्नि यत्नं समाचरेत् रामनाम्नैव देवेषं सर्वं सत्स्यति नान्यतः ७ नामैकं यस्य वाचि स्म
रणपथिगतं श्रोत्रमूलं गतं वा शुद्धं वा शुद्धवर्णं व्यवहितरहितं तारयत्येव सत्यं तच्चेद्देहद्रवि
णजनतालोभपाखंडमध्ये निक्षिप्तं स्यान्न फलजनकं शीघ्रमेवात्र विप्र ८ दशापराधयु
क्तानां न भवेत्सौख्यमुत्तमं तस्माद्धेयं विशेषेण सर्वावस्थासु सर्वदा ९ जाते नामापराधे तु
प्रमादेन कथंचन सदा संकीर्तयेन्नाम तदेकशरणो भवेत् १० नामापराधयुक्तानां नामान्ये
पु व हरंत्यघं अविश्रांतप्रयुक्तानि तान्येवार्थकराणि यत् ११ राम रामेति रामेति रमे रामे मनोर
मे सहस्रनामतत्तुल्यं रामनाम वरानने १२ श्रीराम इति नामेदं रामस्यैव सनातनं सहस्र
नामसदृशं विष्णोर्नारायणस्य च १३ जपतः सर्ववेदांश्च सर्वमंत्रांश्च पार्वति तस्मात्को
टिगुणं पुण्यं रामनाम्नैव लभ्यते १४ येये प्रयोगास्तंत्रेषु तैस्तैर्यत्साध्यते फलं तत्सर्वं
सिध्यति क्षिप्रं रामनामैव कीर्तनात् १५ भूतप्रेतपिशाचाश्च वेतालाश्चेटकादयः कुष्मांडा

Indira Gandhi National
Centre for the Arts

२ राक्षसा घोरा भैरवाः ब्रह्मराक्षसाः १६ श्रीरामनामग्रहणात्पलायंते दिशो दश नैवात्र संशयं
कार्यं ज्ञात्वा श्रीनाम वैभवं १७ तत्रैव श्रीवशिष्टवाक्यं भारद्वाजंप्रति अहो महामुने लो
के रामनामाभयप्रदं निर्मलं निर्गुणं नित्यं निर्विकारं सुधास्पदं १८ प्रत्यक्षं परमं गुह्यं सौ
शील्यादिगुणार्णवं त्यक्त्वा मंदात्मनो जीवाः नानामार्गानुयायिनः १९ तत्रैव नारदवाक्यं
अंवरीषंप्रति सकृदुच्चारयेद्यस्तु रामनाम परेश्वरं शुद्धांतःकरणो भूत्वा निर्वाणमधिगच्छति
२० कीर्तयन् श्रद्धया युक्तो रामनामाखिलेश्वरं परमानंदमाप्नोति हित्वा संसारबंधनं २१ अन
न्यगतयो मर्त्याः भोगिनोपि परंतपाः ज्ञानवैराग्यरहिता ब्रह्मचर्यादिवर्जिताः २२ सर्वपापविनि
र्मुक्ता नाममात्रैकजल्पकाः सगच्छंति परे धाम्नि दुर्लभं योगसंयमैः २३ दुःप्राप्यं योगिनां यद्धि
स्थानं साकेतसंज्ञकं सुखपूर्वं लभेत्तत्तु नामसंराधनात्प्रिये २४ यत्र तत्र स्थितो वापि संस्मरे
न्नाम मुक्तिदं सर्वपापविनिर्मुक्तः सगच्छेत्परमां गतिं २५ मोहानलोल्लसज्ज्वाला ज्वल्लोके ल २

षु सर्वदा श्रीनामांभोधरच्छायां प्रविष्टो नैव दह्यते २६ रामरामेति रामेति रामेति च पुनर्जप
न् स चांडोपि पूतात्मा जाते नात्र संशयः २७ ब्रह्मांडपुराणे जपस्व रघुनंदन रामचंद्र प्रप
न्न आर्तार्तिहराखिलेश वांछामहे नाम निरीक्षमाद्यं नान्यस्पृहा सत्यमिदं कृपालो २८
त्वन्नामसंकीर्तनतो निशाचराः द्रवंति भूतान्यपयांति चारयः नाशं तथा संप्रति यांति राज
न्परात्परं त्वत्सदनं लभंते २९ विष्णुपुराणे अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः
पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ३० ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वाप
रेर्चयन् यदाप्नोति तदाप्नोति कलौ संकीर्त्य राघवं ३१ प्रसंगेनापि श्रीरामनाम ये वै
वदंति च ते कृतार्था मुनिश्रेष्ठ सर्वदोषारिता स्सदा ३२ इत्थं श्रुतं मया सर्वं यत्किं
चित्सारमुत्तमं परंतु रामनामैकं तारकं सर्वसंमतं ३३ केचिज्ज्ञानादिकं कर्म के
चिद्दानादि साधनं कुर्वंति नाम विज्ञानविहीना मानवा भुवि ३४ तत्र योग

Indira Gandhi National
Centre for the Arts

३ रताः केचित्केचित् ध्याने विमोहिताः जपे केचित्तु क्लिश्यंति नैव जानंति तारकं ३५ तत्रैव विरं
चिवाक्यं मरीचिं प्रति अहं च शंकरो विष्णुस्तथा सर्वे दिवौकसः रामनामानुभावेन वै भवं प्राप्त
मुत्तमं ३६ निर्वाणं रामनामेदं वर्णानां कारणं परं ये स्मरंति सदा भक्त्या स्ते पूज्या भुवनत्रये ३७
भविष्यंति कृतार्थास्ते मानवाः पापवर्जिताः ये जपंति परं धाम नाम मांगल्यदायकं ३८ भविष्यपुरा श्रा
णे नारायणवाक्यं लक्ष्मीं प्रति भजस्व कमले नित्यं नाम सर्वेशपूजितं रामेति मधुरं साक्षान्मया
संकीर्त्यते हृदि ३९ जीवाः कलियुगे घोरे राम त्याद् विमुखास्सदा भविष्यंति तमे सत्यं रामनामै
क निंदकाः ४० भविष्यंति दुराचाराः निरये नात्र संशयः कथमानंदमायाति दुःखे नाम पंडमुखे रा
४१ तत्रैव नारदवाक्यं भारद्वाजं प्रति सर्वेषां धनानां वै श्री नामोच्चारणं वरं वदंति वेद विदुषोऽनि जा
मग्ना ज्ञानसागरे ४२ यत्प्रभावादहं नित्यं परमानंदपावनं रूपं रसमयं दिव्यं दृष्टं श्री जनकीपतेः ३
४३ योगादि साधने क्लेशः सर्वथा नात्र संशयः अतः सौलभ्य सन्मार्गं संगच्छेत्सत्त्वसंमतः ४४ अ

नायासेन सर्वेस्वं स्वरूपं दुर्लभं मुने लभते श्रीरामनाम्नस्तु प्रभावाद्भाविको जनः ४५ नारदीये श्रीसू
तवाक्यं सौनकं प्रति भयं भयानामपहारिणी स्थिते मनस्यनंते मम कुत्रतिष्ठति यस्मिन्स्मृते जन्म
न्मशतोद्भवानि भयानि सर्वाण्यपि यांति तात ४६ आयासस्मरणे कोऽस्ति स्मृतो यच्छति शोभनं
पापक्षयश्च भवति स्मरतां तमहर्निशं ४७ प्रातर्निशि तथा संध्या मध्याह्नादिषु संस्मरन् श्रीमद्रा
मम वाप्नोति सद्यः पापक्षयो नरः ४८ नाम संस्मरणक्षीण समस्त क्लेश संचयः मुक्तिं प्रयाति विप्रें
श्रो द्रतस्य वि[illegible]न वाधते ४९ सर्वेषां साधनानां च दृष्टं वै वैभवं मुने परं तु नाम माहात्म्यं कला
दे नार्हति षोडशीं ५० भवतापि परिज्ञातं सर्वं दार्थ संचयं नाम्नः परं क्वचित्तत्त्वं दृष्टं सत्यं वदंच ५१ स्व
त्नं मयापि बहुधा पूर्वं कृतं यत्नं महामुने न प्राप्तं परमानंदं सागरं कोटिजन्मनि ५२ यावच्छ्रीराम
रा नाम्नस्तु प्रभावं परतत्परं नाभ्यस्तं हृदये ब्रह्मन् तावन्नामार्थनिश्चयं ५३ शिवपुराणे शिववा
क्यं नारदं प्रति सीतासमं त्यदा रामनामजाप्यं प्रयत्नतः इदमेव परं प्रेमकारणानां च कारणं ५४
स

Indira Gandhi National
Centre for the Arts

४ सकृदुच्चारणादेवमुक्तिमायातिनिश्चितं नजानेशतसहस्राणांफलमत्यंतदुर्लभं ५५ यन्नामस
ततंध्यात्वा अविनाशित्वंपरंमुने प्राप्तंनाम्नेवसत्यंहिसुगोप्यंकथितंमया ५६ श्रीरामनामस
र्वेश्वरमादिदेवंधन्याःजनाःभुवितलेसततंस्मरंति तेषांभवेन्मुक्तिप्रयत्नतःसदापुरेशभक्ति
र्विमलाप्रसाददा ५७ रामनामाशयंगुह्यंमुनीनांदुर्लभंपरं कथंजानंतिविप्रेन्द्रपामराःदुष्ट
मानसाः ५८ भागवतेश्रीशुकदेववाक्यं आपन्नःसंसृतिंघोरांयन्नामविवशोगृणन् ततःस
द्योविमुच्येतयद्बिभेतिस्वयंभयं ५९ नातःपरंकर्मकृतंनिबंधनंमुमुक्षुणांतीर्थपदानुकीर्तना
त् नतत्पुनःकर्मसुसज्जतेमनोरजस्तमोभ्यांकलिलंयदन्यथा ६० ब्रह्महापितृहागोघ्नोमा
तृहाचार्यहाघवान् श्वादःपुल्कसकोवापि शुद्धेरन्यस्यकीर्त्तनात् ६१ कलिंसभाजयंत्यार्याः
गुणज्ञाःसारभागिनः यत्रसंकीर्त्तनेनैवसर्वस्वार्थोपलभ्यते ६२ एवंव्रतःस्वप्रियनामकीर्त्या ४
जातानुरागोद्रुतचित्तउच्चैः हसत्यथोरोदितिरौतिगायत्युन्मादवन्नृत्यतिलोकबाह्यः ६३ अज्ञा

नादथवाज्ञानादुत्तमश्लोकनामयत् संकीर्तितमघंपुंसांदहत्येधोयथानलः ६४ यथागदंवी
र्यतममुपयुक्तंयदृच्छया अजानतोप्यात्मगुणंकुर्यान्मंत्रोप्युदाहृतः ६५ बृहन्नारदीये स
कृदुच्चारयंत्येतदुर्लभंचाकृतात्मनां कलौघोरतमेब्रह्मन्रामनामाखिलेष्टदं ६६ तेकृ
तार्थाःसदाशुद्धास्सर्वोपाधिविवर्जिताः नाम्नःप्रभावमासाद्यगमिष्यंतिपरंपदं ६७ राम
नामपरायेचनामकीर्तनतत्पराः नामअर्चापरायेचतेकृतार्थाकलौयुगे ६८ तस्मात्स
मस्तलोकानांहितमेवमिहोच्यते रामनामपरान्मर्त्यान्नकलिर्बाधतेक्वचित् ६९ श्रीमद्रा
मेशनाम्नस्तुसततंशरणंव्रजे अस्माकंसत्समाजेषुउपायांतरमनर्थकं ७० सकृदुच्चारयंत्ये
तद्रामनामकलौयुगे तेकृतार्थाःमहात्मानस्तेभ्योनित्यंनमोनमः ७१ न्यूनातिरिक्तताशि
द्धाकलौवेदोक्तकर्मणां नामसंस्मरणादेवसंपूर्णफलदायकं ७२ सीतारामात्मकंनाम
सुधाधामनिरंतरं येजपंतिपराभक्त्यातेषांबाधाकलेर्नहि ७३ श्रीमद्रामनाम्नस्तुसंता

Indira Gandhi National
Centre for the Arts

५ पंप्रेमसंयुतं रसनायांभवेद्यस्यसंवद्योविबुधर्षभैः ७४ स्वपन्भुंजन्व्रजन्तिष्ठन्नुत्तिष्ठंश्च व
दस्तथा येषांसंकीर्तनंनामतेषांनित्यंनमोनमः ७५ नामसंकीर्तनंनित्यंक्षुत्तृट्प्रस्खलना
दिषु करोतिभक्तिहीनोपिसोपिश्रीरामकिंकरः ७६ अहोचित्रमहोचित्रमहोचित्रमिदंपरं राम
नाम्निस्थितेलोकेसंसारंवर्ततेपुनः ७७ मार्कंडेयपुराणेव्यासवाक्यंस्वशिष्यंप्रति धर्मान
शेषसंशुद्धान्सेवंतेयेद्विजोत्तमाः तेभ्यस्सहस्रगुणितंश्रेष्ठंनामामृतेरतं ७८ यस्यानुग्रहतो
नित्यंपरमानंदसागरं रूपंश्रीरामचंद्रस्यसोलभ्यंदुर्लभंपरं ७९ तस्मात्सर्वात्मनारामनाम
मांगल्यकारकं भजध्वंसावधानेनत्यक्त्वासर्वंदुराग्रहान् ८० वेदानांसर्वसिद्धांतसर्वसौख्ये
ककारणं रामनामपरंब्रह्मसर्वेषांमुक्तिदंपरं ८१ श्रीरामनामसन्नाम्नियस्यास्तिहृचिरुज्व
ला रसनासुधामयीतस्यसर्वदोषौघवर्जिता ८२ तत्रैवश्रीव्यासवाक्यंसूतंप्रति रामनाम
पगुह्यंसर्ववेदांतवर्तिनं येरसज्ञाःमहात्मानोनेषांचगोचरंसदा ८३ नामस्मरणनिष्ठानांनि ५
र

सं म्य
र्विकल्पैकचेतसां किंदुर्लभंत्रिलोकेषुतेषांस वदा हे ८४ अज्ञानप्रभवंसर्वंजगत्स्थावरजं
गमे रामनामजपादेवविनष्टंभवतिध्रुवं ८५ भजस्वसततंनामजिह्वयाश्रद्धयासह स्वल्पायासे
नशीघ्रंवैमहामोदःप्रजायते ८६ धन्यंकुलंवरंतस्ययस्मिन्श्रीरामतत्परः जायेसत्वसंपन्नः ते
पुत्रपरमेशवल्लभः ८७ गरुडपुराणे श्रीरामरामरामेतियेवदंत्यपिपापिनः पापकोटिसहस्रे
भ्योतेषांसंतरणंध्रुवं ८८ कलौसंकीर्तनादेवसर्वपापंव्यपोहति अतःश्रीरामनाम्नस्तुसर्वदा
कीर्तनंवरं ८९ अग्निपुराणेश्रीशंकरवाक्यंदुर्वाससंप्रति नभयंयमदूतानांनभयंरौरवादिकं
नभयंकालदंडस्यरामनामानुकीर्तनात् ९० प्रत्यूषापराह्णेपूर्वाह्णेमध्याह्नेचतथानिशी काये
नमनसावाचाकृतंपापंदुरात्मना ९१ परंब्रह्मपरंधामपवित्रंपरमंचयत् तस्मिन्प्रकीर्त्यतेराम
नाम्निरोगौघनाशनं ९२ ब्राह्मणःक्षत्रियःवैश्यस्त्रीशूद्रांत्यजादयः यत्रकुत्रानुकुर्वंतोरामनामानु
र्तनात् ९३ तत्रैवप्रल्हादवाक्यं यत्रभावादहंसाक्षात्त्रीत्वोघोरभ वाणवात् अनायासेन
की

Indira Gandhi National
Centre for the Arts

६ कृत्याल्पेतस्मात् श्रीनामकीर्तनं ॥४ कर्त्तव्यं सावधानेन नाम उच्चारणं सदा साधनांतरं विहायाशु
बुध्वा वैरस्यमात्मनि ॥५ यभुंजन् यत्स्वयं तिष्ठन् गच्छन् च जाग्रत स्थितः कृतवान्यापमद्या
हं कायेन मनसा गिरा ॥६ यत्स्वल्पमपि च स्थूलं कुयोनिनरकावहं तद्गुतु शाप्रशमं सर्वं रामना मा
नुकीर्त्तनात् ॥७ क्रियाकलापहीनो वा संयतो वा विशेषतः रामनामांसं कुर्वन् कीर्तनं मुच्यते
भयात् ॥८ यदीछेत्परमां प्रीतिपरमानंददायिनी तदा श्रीरामनाम्नस्तु कर्तव्यं कीर्तनं परं ॥९
ब्रह्मवैवर्ते हननब्राह्मणमत्यंतंकामतो वा सुरां पिबेत् राम रामेत्यहोरात्रं संकीर्त्य मुच्यते भयात्
१०॥ अपि विश्वासघाती च तथा ब्राह्मणनिंदकः कीर्तयन् राम नामानि पापैर्नोपरिभूयते १ धि
ग्मुतं तमहं मन्ये सततं प्राणवल्लभे यज्जिह्वाग्रे वसेन्नित्यं रामनाम न मंगलं २ रामनामेति मंत्र
त्वायेन गीतं महात्मना तेनैव कृतं सर्वं कृत्यं च संशयं विना ३ वसंति यानि तीर्थानि पावनानि ६
महीतले तानि सर्वाणि श्रीरामनाम्नानि शंकराणि च ४ रामनामा पावं दिव्यं ये वै जानंति सा

दा

दरा त ते ऽकृतार्थाः कलौ राजन्सत्यं सत्यं वदाम्यहं ५ दृष्टः नामात्मकं विश्वं मया विज्ञानचक्षुषा
वाङ्मनोगोचरातीतं निर्विकल्पं प्रमोददं ६ लौकिकी वैदिकी या या क्रिया पुरुषार्थसाधिका तेभ्यो
कोट्यर्बुदगुणं श्रेष्ठं श्रीनामकीर्तनं ७ व्रजन् तिष्ठन् स्वपन् स्नन् श्वसन् वाक्यप्रपूरणे श्रीराम
नामसंकीर्त्य भक्तियुक्तः परं व्रजेत् ८ कथंचिन्नामसंकीर्त्य भक्त्या वा भक्तिवर्जितः दहते सर्व
पापानि युगांताग्निरिवोत्थितः ॥९ जन्मांतरसहस्रेषु कोटिजन्मांतरेषु यत् रामनामप्रभा
वेन पापं निर्यातितत्क्षणात् १० अभक्ष्यभक्षणात्पापं मगम्यगमनाच्च यत् नश्यते नात्र संदे
हो रामनामजपान्मुशं ११ नारदवाक्यं अंवरीषं प्रति अंवरीष महाभाग शृणु मद्वचनं वरं सर्वोपद्र च
वनाशाय कुरु श्रीरामकीर्त्तनं १२ तावत्तिष्ठंति देहेस्मिन्कालकल्मषसंभवं श्रीनामकीर्त्तनं या
वत् कुरुते मानवो नहि १३ यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु न्यूनं संपूर्णतां याति
सद्यो वंदे तं च्युतं १४ आधयो व्याधयो यस्य स्मरणान्नामकीर्त्तनात् शीघ्रं नाशं समायांति ते
म

Indira Gandhi National Centre for the Arts

७ वंदेजानकीपतिं १५ श्रीरामेत्युक्तमात्रेणहेलयाकुलवर्द्धन पापौघंविलयंयांतिदत्तमश्नोति
योयथा १६ गवामयुतकोटीनांकन्यानामयुतायुतैः तीर्थकोटिसहस्राणांसमंश्रीनामकी
र्तनं १७ कूर्मपुराणेशिववाक्यंशिवांप्रति गोप्याद्गोप्यतमंभद्रेसर्वस्वंजीवनंमम श्रीरामनामस
र्वेशमुत्तमानांचमुक्तिदं १८ नियामकानांसर्वेषांकारणंप्रेरकंपरं रामनामैवसहिध्येसत्यंवा
गाम्हतंममर्मसमाहितेनमनसाकीर्तनीयस्सदाबुधैः रामनामात्मकंमंत्रंसततांजीवांतरंमहत्
२० ब्रह्मपुराणेब्रह्मावाक्यंनारदंप्रति इदमेवहिमांगल्यमिदमेवधनागमः जीवनस्यफलंस्वादु
रामनामानुकीर्तनं २१ प्रमादादपिसंस्पृष्टोयथानलकणोदहेत् तथोष्ठपुटसंस्पृष्टोरामनाम
हरेदघं २२ हत्यायुतंकोटिसहस्रमुग्रंगुर्वंगनाकोटिनिषेवणंच तेनान्यसंख्यानिचपातका
निश्रीरामनाम्नानिहतानिसद्यः २३ निर्विकारंनिरालंबंनिर्वैरंवैनिरंजनं सेव्यंश्रीरामनामेदंस ७
र्वेश्वरप्रकाशकं २४ श्रुत्वाश्रीरामनाम्नस्तुप्रभावंपरतरात्परं सत्यंयोनाभिजानातिदृष्टव्यंत

न्मुखंनहि २५ विज्ञानंपरमंगुह्यंइदमेवमहामुने सबाह्याभ्यंतरंनामचिंतनंमनसागिरा २६
मत्स्यपुराणे येनध्यातंश्रुतंगीतंरामनामेष्टंमहत् कृतंतेनैवसत्कृत्यंवेदोदितमखंडितं
२७ ध्येयंगेयंपरंपेयंरामनामाक्षरंमुने सर्वसिद्धांतसारेदंसौख्यसौभाग्यकारणं २८ ना
मैवपरमंज्ञानंध्यानंयोगंतथारतिः विज्ञानंपरमंगुह्यंरामनामैवकेवलं २९ येषांरामः
प्रियोनैवरामेन्यूनत्वदर्शिनां द्रष्टव्यंनमुखंतेषांसंगतिस्तुकुतस्तरां ३० वाराहपुराणेदै
वाच्छूकरसावकेननिहतोम्लेक्षोजराजर्जरोहारामेणहतोस्मिभूमिपतितोजल्पंस्तनुंत्यक्त
वान् तीर्णोगोष्पदवद्भवार्णवमहोनाम्नःप्रभावादिदंकिंचित्रंयदिरामनामरसिकास्तेयांति
रामास्पदं ३१ निरपेक्षंसदास्वच्छंसर्वसंपत्तिसाधकं भजध्येरामनामेदंमहामांगलिकंप
रं ३२ वामनपुराणे अघौघावज्रपाताद्याः अन्येदुर्नीतसंभवाः स्मरणाद्रामभद्रस्यसद्यो
यांतिक्षयंक्षणात् ३३ अश्वमेधादिभिर्यज्ञैःनरमेधशतैरपि याजितंतेनयोनोक्तंरामेति

Indira Gandhi National Centre for the Arts

८ अक्षरद्वयं ३४ एवमेतियेभक्तिरतामनुष्याःसंकीर्त्यमानेरघुवंशवर्ये तेमुक्तपापाःसुखि
नोभवंतियथामृतप्राशनतर्पितास्तु ३५ परदाररतोवापिपरापकृतकारकः सशुद्धोमुक्ति
मायातिरामनामानुकीर्त्तनात् ३६ अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा यःस्मरेत्पुंडरी
काक्षंसबाह्याभ्यंतरःशुचिः ३७ सर्वेषांराममंत्राणांश्रेष्ठंश्रीतारकंपरं षडक्षरमनुसाक्षा
त्तथायुग्माक्षरंवरं ३८ ध्येयंनित्यमनन्यप्रेमरसिकैःपेयंतथासादरं ज्ञेयंज्ञानरतात्मभि
३९ श्चसुजनैस्संस्यक्तिपाशांतये श्रीमद्रामपरेशनामसुभगंसर्वाधिपंशर्मदं सर्वेषांसुहृदंसु
रासुरनुतंश्रानंदकंदंपरं ४० रामनामानिशंभक्त्याजप्तव्यंसप्रयत्नतः नातःपरतरोपायोदृ
श्यतेश्रुयतेपिवा ४१ एवोलापंवदन्क्रीडांयेषानायातिसत्वरं हित्वाश्रीरामनामेदंते
नराःपशवःस्मृताः ४२ अहोनामामृतालापीजनःसर्वार्थसाधकः धन्याद्धन्यतरोनित्यं
सत्यंसत्यंवदाम्यहं ४३ रामनाम्नाजगत्सर्वंभासितंसर्वदाद्विज प्रभावंपरतमंतस्यवच ८

नागोचरंमुने ४४ अलंयोगादिसंक्लेशैर्ज्ञानविज्ञानसाधनैः वर्त्तमानेदयासिंधोरामना
मेश्वरेमुने ४५ लिंगपुराणेपरमेधर्मनिर्णये शंकरवाक्यंपार्वतिंप्रति रामात्परतरंनास्ति
सर्वैश्वर्यमनामयं तस्मात्तन्नामसंलापेयत्नंकुरुममप्रिये ४५ आचांडालजीवानामधि
कारोस्तिवल्लभे श्रीरामनाममंत्रेस्मिन्सत्यंसत्यंसदाशिवे ४६ यत्प्रभावबलमंशतोशि
वेशिवपदंशुभगंपदवाप्त तद्भक्तिरहिताःकिलजीवाःयांतिकष्टतमंयमसादं ४७ साका
राच्चनिराकाराद्रामनामपरंप्रिये गोप्याद्गोप्यतमंवस्तुकृपयासंप्रकाशितं ४८ स्मर्त्तव्यं
म सदारामनामनिर्वाणकारकं क्षणार्द्धमपिविस्मृत्यंयातिदुःखालयंजनः ४९ महतस्त
पसोमूलंप्रसवःपुण्यसंततेः जीवनस्यफलेस्वादसदाश्रीनामकीर्त्तनं ५० वायुपुराणे
सदाशिववाक्यंनारदंप्रति श्रीरामनामसामर्थ्यंवैभवंसौर्यविक्रमं नवक्तुंकोपिशक्नो
तिसत्यंसत्यंचनारद ५१ संततंरामरामेतियस्तुकीर्तयतेसदा गुरुतल्पेशतेनापिसपूतो

Indira Gandhi National
Centre for the Arts

भवतिध्रुवं ५२ यातनायमलोकेषुतावदेवभवेन्नृणां यावन्नभजतेप्रीत्यारामनामप
रात्परं ५३ सर्वेषामवताराणांकारणंपरमाद्भुतं श्रीमद्रामेतिनामेतिउच्यतेसन्द्रिरन्वहं
५४ यत्रयत्रसमुद्धारोदृश्यतेश्रूयतेथवा तत्सर्वंरामनाम्नैवसत्यंसत्यंवचोमम ५५ इति
श्रीनामप्रतापप्रकाशेप्रमोदनिवासेश्रीयुगलानन्यसरनसंग्रहीते अष्टादशपुराणवा
क्यप्रमाणनिरूपणंनामप्रथमप्रमोदः॥१॥ अथोपपुराणवचनं वृहद्विष्णुपुराणे कृना
कृष्णगमनंपुनरावृत्तिलक्षणं कृजपोरामनाम्नस्तुमुक्तेर्बीजमनुत्तमं १ सर्वरोगोप
शमनंसर्वोपद्रवनाशनं शांतिदंसर्वारि नोरामनामानुकीर्तनं २ नास्तिश्रीरामनाम्नस्तु
परत्वंदृश्यतेक्कचित् सदृशंत्रिषुलोकेषुसर्वतंत्रेषुकुत्रचित् ३ रामरामेतियोनित्यंमधुरं
जपतिक्षणं ससर्वसिद्धिमाप्नोतिरामनामानुभावतः ४ नृसिंहपुराणेभगवद्वाक्यं रामरा
मेतिरामेतिसततंसंस्मरंतिये नयेववल्लभास्माकमीश्वराणांचनारद ५ नारकास्तेनरानीचाःज्ञी ऐ

वनोपिम्रतोपमाः तेषामपिभवेन्मुक्तिरामनामानुकीर्त्तनात् ६ तत्रैवश्रीप्रल्हादवाक्यंपित
रंप्रति रामनामजपतांकुतोभयंसर्वतापशमनैकभेषजं पश्यतातममगात्रसंनिधोपावकोऽ
म पिसलिलायतेऽधुना ७ रामनाम्नोप्रभावेनमुच्यतेसर्वबंधनात् तस्मात्त्वमपिदैत्येशतद्वशर
णंव्रज ८ नारदीये श्रीरामेतिजपन्जंतुःप्रत्यहंनियतेंद्रियः सर्वपापविनिर्मुक्तःसुखज्ञासतेन
रः ९ सौभाग्यंसर्वदास्वच्छंसरसानंदमद्भुतं अवश्यंलभतेभक्त्यारामनामानुकीर्त्तनात् १० पति
व्रतानांसर्वासांरामनामानुकीर्तनात् ऐहिकामुष्मिकंसौख्यंभवेन्नैवात्रसंशयं ११ सर्वासांवि
हायाप्युजपेन्नामनमहाबलं अहोरात्रेलभेत्सोपिकैवल्यादुर्लभंपदं १२ आदित्यपुराणेशिववा
क्यंपार्वतींप्रति अहंजपामिदेवेशिरामनामाक्षरद्वयं श्रीसीतायाःस्वरूपस्यध्यानंकृत्वाहृदिस्थ
ले १३ रामनाम्निस्थितास्सर्वेभ्रातरःपरिकरास्तथा गुणानांनिचयंदेवितथाश्रीधामसन्निभं १४
नामविम्रहहीनानांसाधनांतरकल्पना कृतामहर्षिभिर्विज्ञैःरामनामार्थनैष्ठिकाः १५ आगिगु

Indira Gandhi National
Centre for the Arts

१० राणे नामसंकीर्त्तनात्सर्वैमंगलंशाश्वतंशिवे सामीप्यंरामचन्द्रस्यतथासर्वार्थसंचयं १६ श्रीरामे॥
तिमनुष्योयःसमुच्चारयतिसदा जीवन्मुक्तोभवेत्सोपिसाक्षाद्रामात्मकःसुधीः १७ सुरद्रुमचयं
हित्वाएरंडंसमुपासते यस्यान्यसाधनेप्रीतिःसंत्यक्त्वानाममंगलं १८ आभ्यंतरंतथावाह्यंयस्तु॥
श्रीराममुच्चरेत् स्वल्पायासेनसंकाशंजायतेहृदिपंकजे १९ शुकपुराणेश्री अगस्त्यवाक्यंसुतीक्ष्णं
प्रति श्रीमद्रामेतिनामेतिजीवनानांचजीवनं कीर्त्तनात्सर्वरोगेभ्योमुच्यतेसर्वथामुने २० ब्रह्मांडशतदा
नस्ययत्फलंसमुदाहृतं तत्फलंलभतेविप्रसकृच्छ्रीराममुच्चरन् २१ यथाहिपावकोतीवरजसाछन्न
तांव्रजेत् तथाविश्वासहीनानांनास्तिनामार्थवैभवं २२ अहोभाग्यतमाःसर्वेनामसंलग्नमानसाः
पावयंतिजगत्सर्वंरामनामार्थचिंतनात् २३ यत्प्रभावंसमासाद्यशुकोब्रह्मर्षिसत्तमः जपस्वतन्म
हामंत्रंरामनामरसायनं २४ पुराणसंग्रहेसूतवाक्यंशौनकंप्रति इदानींरामनाम्नस्तुरहस्यंसंवदामि
ते यच्छ्रुत्वाप्रपठित्वाचनरायास्यंतिसद्गतिं सर्वेषांराममंत्राणांरामनामपरंस्मृतं गोप्यंश्रीकाशि १०
२५

नाथस्यजीवनंचित्तशोधकं २६ सुलभंसर्वजीवानांअनायासेनतारकं येनकेनप्रकारेणज
पन्मोक्षप्रदंनृणां २७ एवंरीत्याजपेद्यस्तुरामनामाखिलेश्वरं तस्यास्तिकरतलेसिद्धिरनाया
सेनसत्वरं २८ पृष्टारीतिंयथातथ्यंगुरोस्सानिध्यतोमुने तत्पश्चादभ्यसेन्नामसर्वेश्वरम
तंद्रिनः २९ स्वल्पाहारंतथाशयनंस्वल्पंवाक्यंनिरंतरं गमनादिकंपरित्यज्यमिथ्यासंभाषणं
मुने ३० इहैवलभतेनित्यंपरिकराणांसमागमं तथानानारहस्यानांज्ञानंसंजायतेध्रुवं ३१ नाम्न
परात्परैश्वर्यंकथंवाचावदामिते स्मरणाल्लक्ष्यतेविश्वंरामरूपेणभास्वरं ३२ भारतविभागे सर्वल
क्षणहीनोपियुक्तोवासर्वपातकैः सर्वंतरतितत्पापंभावयन्नाममंगलं ३३ प्राणप्रयाणपाथेयं
संसारव्याधिभेषजं दुःखशोकात्परित्राणंरामेतिअक्षरद्वयं ३४ मातृहापितृहागोघ्नोब्रह्महाचार्य
हामुने श्वादःपुल्कसकोवापिशुद्धेरन्रामनामतः ३५ सर्वमंगलमांगल्यंसर्वसिद्धांतपारगं सर्व
देवाधिपंभद्रंसर्वसंपत्तिकारकं ३६ महानादस्यजनकंमहामोक्षस्यहेतुकं महाप्रेमरशोशानंमहा

Indira Gandhi National
Centre for the Arts

११ मोदमयंपरं ३७ आल्हादकानांसर्वेषांरामनामपरात्परं परंब्रह्मपरंधामपर्मकारणकारणं ३८
गणेशपुराणे रामनामपरंधेयंतदास्वछन्दशाश्वतं सर्वदासद्भिरित्युक्तंपूर्वमांजगदीश्वरैः ३९
अहंपूज्योभवेल्लोकेश्रीमन्नामानुकीर्त्तनात् अतःश्रीरामनाम्नस्तुकीर्तनंसर्वदोचितं ४० वि
घ्नानांचविहंतारंदातारंसर्वसंपदां सुधासारंसदास्वछंनिर्विकारंनिराश्रयं ४१ धार्यंसदाप्रयत्ने
नममवाक्यंसुधोपमं सर्वेषांसुखदंनित्यंमुक्तिदंनात्रसंशयः ४२ नंदीपुराणेनंदीश्वरवाक्यं
गणान्प्रति सर्वदासर्वकालेषुयेनकुर्वंतिपातकं रामनामजपंकृत्वायांतिधामसनातनं ४३
शृणुध्वंभोगणाःसर्वेरामनामपरंबलं यत्प्रसादान्महादेवोहालाहलमपीपिवत् ४४ इतिहा
सोत्तमे श्रीरामनामसंकीर्त्यंयस्यपुंसोनजायते सरोमपुलकंगात्रेसभवेत्कुलिशोपमः ४५
रामनामजपेयेषामश्रुपातोभवेन्नहि तएवखरतुल्यास्तेपूताःचैपातकालयाः ४६ श्रुत्वा
श्रीरामनाम्नस्तुवैभवंपरमार्थिकं श्रवतेनैवललंनेत्रात्तस्मिन्नेत्रेक्षिपेद्रजः ४७ अहं ११

मप्यत्रनामानिकीर्त्तयामिजगत्पतेः तानिवःश्रेयसेनित्यंभविष्यंतिनसंशयः ४८ अहो
सतांसंगसमुद्भुतंफलंपरंपवित्रंनरकादिनाशनं कर्त्तव्यमेतद्धिसदैवसज्जनैः श्रीरामना
म्नियदिविह्वलारतिः ४९ अहोभारतवर्षोयंमंगलायतनोमहान् यस्मिन्श्रीरामनाम्नस्तु
ध्वनिःसंश्रूयतेसदा ५० तत्रैवनारकान्प्रतिपुष्करवाक्यं सकृत्संकीर्तितोदेवःस्मृतोवामु
क्तिदोन्टणां स्मरतांसंततंनामनजानेकिंफलंभवेत् ५१ कृतघ्नानांशिरोरत्नंरामःकमल
लोचनः कथंनद्रवतेश्रुत्वास्वनामाव्हानमुत्तमं ५२ किमत्रहाहोकारेणयुष्माकमधु
नाधुवं स्मरध्वंरामनामाख्यंमंत्रंदुःखापहारकं ५३ कालंकरालंअत्यंतंदृष्ट्वास्वप्नमि
दंजगत् रामनामजपात्क्षिप्रंजागृतिंयातिनिश्चितं ५४ रामनाम्निसुधाधाम्निकुतर्कं
निरयावहं समाश्रयंतियेपापातेवैतुराक्षसाधमाः ५५ मार्तंडस्यचसंकाशंसर्वलोकैक
गोचरं उलूकानेत्रहीनाश्चनैवपश्यंतिदुर्भगाः ५६ अगुवाक्यंतत्रैव श्रुत्वानामानितत्रस्थाते

Indira Gandhi National
Centre for the Arts

१२ नोक्तानितथाद्विज नरकन्नरकान्मुक्तासद्यएवमहामुने ५७ श्वादोपिनैवशक्तोपिकर्तुं
पापानियत्नतः यावंतितावतीशक्तिरामनाम्नोशुभक्षये ५८ स्वप्नेपिरामस्मरतिरादिपुंसः
क्षयंकरोत्याहितुपापराशेः प्रयत्नतःकिंपुनरादिपुंसःसंकीर्त्यतेनामरघूत्तमस्य ५९ इदमे
वपरंभाग्यंप्रसस्तंसद्भिरूच्यते श्रीमद्रामनाम्नस्तुसततंकीर्तितंमुने ६० चातुर्यंसर्वंथावि
प्र इदमेवसुनिश्चितं नामव्याहरणंनित्यंत्यक्त्वादुर्वासनादिकं ६१ पुराणमहर्षयःसर्वेरामना
नामास्विलेष्टदं दहत्येनांसिसर्वाणिप्रसंगात्किमुभक्तितः ६३ तथाचजंबूद्वीपवर्णनेनर्मदातीरवैश्य
वान्प्रतिभगवद्वाक्यं मद्भक्तास्सस्यमेत्तस्तुवाक्यमेशृणुताधुना सकृदुच्चार्यमन्नाममनुष्यो
जायतेनरः ६४ रामनामसमंनामनभूतोनभविष्यति तस्मात्तदेवसंकीर्त्यमुच्यतेकर्मबंध
नात् ६५ लघुभागवते गोवधःस्त्रीवधःस्तेयंपापंब्रह्मवधादिकं श्रीरामकीर्त्तनादेवशात्
ध्यायातिसत्वरं ६६ किंतातवेदागमशास्त्रविस्तरैस्तीर्थैरनेकैरपिकिंप्रयोजनं यद्यात्मनोवा १२

छसिमुक्तिकारणं श्रीरामश्रीरामइतिस्फुटंरट ६७ वर्त्तमानंचयत्पापंयद्भूतंयद्भविष्यति
तत्सर्वंनिर्दहत्याशुरामनामानुकीर्त्तनात् ६८ तेकृतार्थाःमनुष्येषुसुभाग्याःनृपनिश्चितं
स्मरंतियेस्मारयंतिरामनामकलौयुगे ६९ अभक्ष्यभक्षणात्पापमगम्यागमनाद्भवेत् तत्स
र्वंविलयंयांतिरामनामानुकीर्त्तनात् ७० सदाद्रोहपरोयस्तुसज्जनानांमहीतले जायते
पावनोधन्योरामनामेतिकीर्त्तनात् ७१ श्रीरामेतिमुदायुक्तःकीर्त्तयेद्यस्त्वनन्यधीः पाव
नेनचधन्येनतेनेयंपृथिवीधृता ७२ प्रभासपुराणे मधुरालयमसौमुख्यनामसर्वेश्वरेश्व
रं रसनायांस्फुरत्याशुतस्यदृग्गोचरोपरः ७३ तत्रैवनारदंप्रतिभगवद्वाक्यं नाम्नांमुख्यतमं
नामरामाख्यंपरंतपः प्रायश्चित्तमशेषाणांपापानांमोचकंपरं ७४ श्रीरामनामपरमंप्रा
णात्प्रियतरंमम नहितस्मात्प्रियःकश्चित्सत्यंजानीहिनारद ७५ नराणांक्षीणपापानांसर्वेषां
सुकृतात्मनां इदमेवपरंध्येयंनान्यत्स्वप्नेपिनारद ७६ देवीभागवतेव्यासवाक्यंशुकंप्रति

Indira Gandhi National
Centre for the Arts

१३ जीवानांदुष्टभावानां कृतघ्नानांतथाशुक चरितंदुःखालयंतातनिवोमयमयंसदा ७७ श्री
मद्रामनाम्नस्तुप्रभावंपरतरात्परं ज्ञानवैराग्यहीनानांदर्शनैवभवेत्कदा ७८ गर्भांतरेतुयत्स्तो
त्रंकरुणानिधिरग्रतः सततंकीर्तनंरामनामकुर्वन्समादरात् ७९ त्यक्त्वादुराग्रहंसर्वंकुटुं
वादिकसंग्रहं करिष्यामिसदाभक्त्यातवनामानुकीर्त्तनं ८० तत्सर्वंविस्मृतंतातअधमेनात्म
हारिणा तस्मादनेककष्टानिप्राप्नुवंतिमलायना ८१ कालिकापुराणे रामेत्यभिहितेदेवेपरमा
त्मनिरामये असंख्यमखतीर्थानांफलंतेषांभवेध्रुवं ८२ रामनामप्रभादिव्यात्सर्ववेदांतपारगाः
वदंतिनियतंराजन्ज्ञात्वासर्वोत्तमोत्तमा ८३ सर्वासामेवशक्तीनांकारणंतमसःपरं श्रीरामना
मपरमेशंसौख्यदंशरणार्थिनां ८४ प्राणानांप्राणमित्याहुर्जीवानांचैवजीवनं मंत्राणांपरमंमं
त्रंरामनामसदव्ययं ८५ क्रियायोगसारे उक्तंगौर्मुनिभिःसर्वैस्मरणेरामनाम्निच नकालनिय
मःप्रोक्तःसर्वदुःखानिनाशनं ८६ नामप्रभावंमहर्षेरामचन्द्रस्यशाश्वतं ब्रवीम्यहंसमासे १३

नसेतिहासंनिशामय ८७ रामेतिसततंनामपठ्यतेसुंदराक्षरं रामनामपरंब्रह्मसर्ववेदाधिकं
महत् ८८ समस्तपातकध्वंसीसमुकस्तुतदापठत् नामोच्चारणमात्रेणतयोश्च कवेश्ययोः
८९ विनष्टमभवत्पापंसर्वमेवसुदारुणं रामनामप्रभावेनदुर्लभंकिंमहीतले ९० रामना
मप्रतापेनतौगतौधाम्निसत्वरं इदंशंरामनामेदंजपश्चद्विजसत्तम ९१ विष्णोर्नामानिविप्रें
द्रसर्ववेदाधिकानिच तेषांमध्येतुतत्वज्ञैरामनामपरंस्मृतं ९२ रामेत्यक्षरयुग्मंहिसर्वमंत्रा
धिकंद्विज यदुच्चारणमात्रेणपापीयातिपरांगतिं ९३ रामनामप्रभावोयंसर्ववेदप्रपूजितः
महेशएवजानातिनान्योजानातिवैमुने ९४ विष्णोर्नामसहस्राणिपठनाल्लभ्यतेफलं तत्फलं
लभतेमर्त्योरामनामस्मरन्नपि ९५ तत्रैवधर्मराजवाक्यंदूतान्प्रति दूताःस्मरंतौतौचापिरामनामाक्ष
रद्वयं तदानमेदंडनीयौतयोःसीतापतिःप्रभुः ९६ संसारेनास्तितत्पापंयद्रामस्मरणैरपि नयातिसंश
यंसद्योददंश्रृणुतकिंकरा ९७ येमानवाःप्रतिदिनंरघुनंदनस्यनामानिघोरदुरितौघविनाशका

Indira Gandhi National
Centre for the Arts

१४ निभक्ताः स्मरंतिविबुधाः प्रवराश्चितस्यतेपापिहिभटाममनैवदंध्याः ९८ तस्मात्सर्वपुराणाद्योवेश्यां
तुसम्बुकौभटाः पूजनीयोचतोनित्यमस्माभिर्नात्रसंशयः ९९ तावत्तिष्ठंतिपापानिदेहेषुदेहिनांवर
रामनामेतियावद्वैनस्मरतिसुखप्रदं १०० श्राद्धेचतर्पणेचैववलिदानेतथोत्सवे यज्ञेदानेव्रतेचैवदे
वताराधनेपिच १ अन्येष्वपिचकार्येषुवैदिकेषुविचक्षणैः स्मरेत्तदाभवेत्सर्वफलंसर्वत्रसर्वदा २
मृत्युकालेद्विजश्रेष्ठरामरामेतियःस्मरेत् पापात्मापिपरंमोक्षंप्राप्नुयान्नात्रसंशयः ३ रामेतिनाम
यात्रायांयेस्मरंतिमनीषिणः सर्वसिद्धिर्भवेत्तेषांयात्रायांनात्रसंशयः ४ अरण्येप्रांतरेवापिश्म
शानेचभयानके रामनामस्मरेत्तस्यविद्यतेनापदोद्विज ५ राजद्वारेतथादुर्गेविदेशेदस्युसंमुखे दुः
स्वप्नदर्शनेचैवग्रहपीडसुजेमिने ६ औत्पातिकेभयेचैववातरोगभयेद्विज रामनामस्मरन्मर्त्यो
लभतेनाशुभंक्वचित् ७ रामनामद्विजश्रेष्ठसर्वाशुभनिवारणं कामदंमोक्षदंचैवस्मर्तव्यंसततं
बुधैः ८ रामरामेतिविप्रर्षेयस्मिन्नस्मर्यतेक्षणे सक्षणःसएवव्यर्थःस्यात्सत्यमेवमयोच्यते ९
१४

स्मरंतोरामनामानिनावसीदंतिमानवाः सत्यंवदामितेब्रह्मन्रामनामपरंबलं १० जन्मकोटिदुरितक्ष
यमिच्छुःसंपदंचलभतेभुविमर्त्यः रामनामसततंयदिभक्त्यामधुरंस्मरंतुःसा ११ अहोचरित्रं
ति जीवानांदुष्टानांपापकर्मणां रामेमुक्तिदंनामनस्मरंतिनराधमा १२ अहर्निशंनामपरात्परेश्व
रंजपंतियेतेसुखदासदाशिवाः तेषांपदस्पर्शरजोभिषेकासदेवपूतारपिपापिनोद्विज १३ सह
स्रास्येनशेषोपिरामनामस्मरत्फलं तत्प्रभावेनब्रह्मांडंधृत्वाकेशेविनाद्विज १४ वक्तुंअमोन
वाल्योपिश्रोतुमत्यंतसुंदरं तथापिरामनामेदंनस्मरंतिदुराशयाः १५ रामनामामृतंस्वादुकथं
वाचावदामिते स्मरणेनैवजातव्यंसर्वदाबुधसत्तमैः १६ सर्वेकृतंतेनयेनोक्तंनाममुक्तिदं ना कृतं
तःपरतरंवस्तुक्वचित्संदृश्यतेद्विज १७ यावत्श्रीरामनाम्नस्तुप्रतापंनायातिहृतस्थले ताव
त्कालंभ्रमंतीहविमुखासर्वयोनिषु १८ रामनामजपतत्परंजनंयत्फलंभवतिन्निहृपणेयां
तिनैवभ्रमतोपिकदाचिन्निवशिवाश्रुतिशेषगणेशैः १९ सर्वेषांयोग्यतानास्तितथासामर्थ्य

Indira Gandhi National
Centre for the Arts

१५ मुन्नतं श्रीरामनामसंलापसुकृतौघनिरूपणे २० मानुषंजन्मसंप्राप्ययेनो[illegible]मक्षरद्वयं तेपिशा
चाश्चचांडाला सर्वप्रेतप्रपूजितं २१ आदिपुराणेकृष्णवाक्यं रामनामसदाग्राहीरामनामप्रियःस
दा भक्तिःतस्मैप्रदातव्यानचमुक्तिःकदाचन २२ गायंतिरामनामानिवैष्णवाश्चयुगेयुगे त्यक्त्वा
चसर्वकर्माणिधर्माणिचकपिध्वज २३ रामनामैवनामैवरामनामैववकेवलं गतिस्तेषांगतिस्तेषांग
तिस्तेषांसनिश्चितं २४ श्रद्धयाहेलयानामवदंतिमनुजाभुवि तेषांनास्तिभयंपार्थरामनामप्रसाद
तः २५ रामनामरतायत्रगछंतिप्रेमसंप्लुताः भक्तानामनुगछंतिमु[illegible]ःस्तुतिभिःसह २६ मानवायेसु
धासारंरामनामपिवंतिवै तेधन्याःमृत्युसंत्रासरहिताःपरमेशवल्लभाः २७ नामैवपरमामुक्तिर्नामै
वपरमागतिः नामैवपरमाशांतिर्नामैवपरमास्थितिः नामैवपरमाभक्तिर्नामैवपरमाधृतिः २८
नामैवपरमाप्रीतिर्नामैवपरमास्मृतिः २९ नामैवपरमंपुण्यंनामैवपरमंतपः नामैवपरमंधर्मो
नामैवपरमोगुरुः ३० नामैवपरमोज्ञानंनामैवचाखिलंजगत् नामैवजीवनंजंतोर्नामैवविपुलंधनं ३१ १५

नामैवजगतां[illegible]ंनामैवजगतांप्रियं नामैवजगतांध्यानंनामैवजगतांपरं ३२ नामैवशरणंजं
तोर्नामैवपरमेश्वर नामैवजगतांबीजंनामैवपावनंपरं ३३ रामनामरता[illegible]तेवैश्रीरामभा
वुकाः [illegible] दर्शनादेवभवेद्भक्तिरसात्मिका ३४ कामादिगुणसंयुक्तानाममात्रैकबांधवाः
प्रीतिंकुर्वंतितेपार्थनतथाजितषड्गुणाः ३५ तंदेशंपतितंमन्येयत्रनास्तिसवैष्णवः रामनामप
रोनित्यंपरानंदविवर्द्धनः ३६ रामनामरताःजीवाःनपतंतिकदाचन इंद्रादयःपतंत्येतेतथापिये
धिकारिणः ३७ नामस्मरणमात्रेणप्राणान्मुंचंतियेनराः फलंतेषांनपश्यामिभजामितांश्चपार्थ प
व ३८ नामस्मरणमात्रेणनरोयातिनिरापदं येस्मरंतिसदारामंनजानेतस्यकिंफलं ३९ नामैवजग
तांबंधुर्नामैवजगतांप्रभुः नामैवजगतांजन्मनामैवसचराचरं ४० नामैवधार्यतेविश्वंनामैवपा
ल्यतेजगत् नामैवनीयतेनामनामैवभुंजतेफलं ४१ नामैवषट्शास्त्राणांतात्पर्यार्थमुत्तमं
नामैववेदसारासिसिद्धांतंसर्वदाशिवं ४२ नामैवक्रियतेकर्मनामैवनीयतेफलं नामैवगम्यतेना

Indira Gandhi National
Centre for the Arts

१६ मणोप्यंपरतरात्परं ४३ नाम्नैवलीयते वेधापरे ब्रह्मणिनिश्चला नाम्नैवचंचलंचित्तंमनस्त
स्मिन्प्रलीयते ४४ श्रीरामस्मरणेनैवनरोयातिपरांगतिं सत्यंसत्यंसदासत्यंनजानेनामजंफ
लं ४५ रामनामप्रभावोयंसर्वोत्तमउदाहृतः समासेनतथापार्थवक्ष्येहंतवहेतवे ४६ ननाम
सदृशंज्ञानंनमामसदृशंलयः ननामसदृशंपुण्यंननामसदृशंव्रतं ४७ ननामसदृशंध्यानं
ननामसदृशोजपः ननामसदृशंत्यागोननामसदृशीगतिः ४८ ननामसदृशंतीर्थंननामसदृ
शस्तपः ननामसदृशंकर्मननामसदृशःदमः ४९ ननामसदृशीमुक्तिर्ननामसदृशःप्रभुः
येगृह्णंतिसदानामतयेवजितषड्गुणाः ५० कुर्वन्नवाकारयन्चापिरामनामजपंसदा नीत्वा
कुलसहस्राणिपरंधामाधिगच्छति ५१ नाम्नैवनीयतेपुण्यंनाम्नैवनीयतेतपः नाम्नैवनीय
तेधर्मोजगदेतच्चराचरं ५२ रामनामप्रसादेनसर्वसिद्धीश्वरोभवेत् विश्वासेनैवश्रीरामना
मजाप्यंसदाजनैः ५३ शांतोदांतःक्षमाशीलोरामनामपरायणः असंख्यकुलजानावे १६

तारणेसर्वदाक्षमः ५४ येनामयुक्ताविचरंतिमर्त्यास्त्यक्त्वार्थकामान्विषयांश्चभोगान् ते
षांचभक्तिःपरमाचनिष्ठासदैवशुभगाभवतिध्रुवाशिवा ५५ त्यक्त्वाश्रीरामनामानिकर्मकु मा
र्वंतियेधमाः तेषांकर्माणिबंधायनसुखायकदाचन ५६ स्मरंतिरामनामानित्यक्त्वाकर्माणिचा
खिलं तेषांकर्माणिकुर्वंतिऋषयःतत्पराःप्रियाः ५७ रामनामसदाग्राहीहीत्वाकर्माणिचाखि
लं सपूतसर्वपापेभ्योपद्मपत्रमिवांभसा ५८ यस्यचेतसिश्रीरामनाममांगलिकंपरं सजि
त्वासकलाल्लोकान्परंधामाधिगच्छति ५९ नामयुक्ताःजनाःपार्थजात्यंतरसमन्विते प्रीतिं
कुर्वंतिश्रीरामेननतथाजितषड्गुणाः ६० गायंतिरामनामानिसततंयेजनाभुवि नमस्तेभ्योनमस्तेभ्यो
नमस्तेभ्योपुनःपुनः ६१ इतिविज्ञापितंतातनबुध्येदमवधारय रामनामप्रसादेनसर्वसुखमवाप्स्य
सि ६२ नोनामममगाथांविचरंतिगीत्वातेषामिदंभाग्यमतीवपुण्यं येनामगाथापरतत्त्वनिष्ठा
तेधन्यधन्याभुविकृत्यपुण्याः ६३ रामनामजनाशक्ताःरामनामजनप्रियः सपूतोनिर्विकल्पश्च

Indira Gandhi National
Centre for the Arts

१७ सर्वपापवहिर्मुखः ६४ रामनामप्रसंगेनयेजपंतीहचार्जुन तेपिध्वस्ताखिलाघौघायांतिरामा
ख्यंपदं ६५ ब्वोथयेन्नामनिर्वाणकारणंयस्त्वनन्यधीः तस्यपुण्यफलंपार्थवक्तुंकःशक्नुते
भुवी ६६ तस्मान्नामानिकौंतेयभजस्वदृढचेतसा रामनामसदायुक्ताःप्रियास्माकंसंध्रुवं ६७ नि रा
र्विस्साचेतसानामगायंतिसततंनरा तेषांमध्येसदावासःश्रीरामस्यविशेषतः ६८ अहूयाहेल
या चापिगायंतिनाममंगलं तेषांमध्येसदानामीवसेन्नैवात्रसंशयः ६९ नतत्रविस्मयंकार्यो
भवतारामनाम्निच सत्यंवदामितेपार्थप्रियायममचात्मनि ७० यन्नामस्मरतोनित्यंमहा
अज्ञानबंधनं छिद्यते अनायासेनतमहंराघवंभजे ७१ अद्धयापरयायुक्तोरामनामपरायणः
करोतिजानकीजानिस्तस्यचिंतांपुनःपुनः ७२ अशेषवासनायुक्तःकामक्रोधपरायणः स
पूतःसर्वपापेभ्योयस्यनामपरंतप ७३ ब्रह्महापिसुरापीचस्तेयीस्वर्णापहारकः सपूतःस
र्वपापेभ्योयस्यनामपरंतप ७४ रामनामसदाप्रेम्णासंस्मरामिजगद्गुरुं क्षणंनविस्मरेतंयो १७

तिसत्यंसत्यंवचोमम ७५ नामयुक्तान्जनान्दृष्ट्वायःपत्र्युपेत्सादरंसखे सयातिपरमंस्थानंर
मेणासहमोदते ७६ नामयुक्तान्जनान्दृष्ट्वाप्रणमंतिचयेनराः तेपूताःसर्वपापेभ्योकर्मणा
तेनहेतुना ७७ मदमात्सर्यसंपन्नःपरजीवापहारकः सपूतःसर्वःपापेभ्योयस्यनाम्निसदा
रुचिः ७८ अदोषपातकैर्व्याप्ताःस्वधर्मपरिवर्जिताः एतेतरंतिपापिष्ठाःरामनामप्रसादतः
७९ निंदंतिरामनामानिनिंदंतिवदनानिच तथापिनरकेमूढाःपतंत्यत्यद्भुतंमहत् ८० वि
सृज्यरामनामानिकुर्वंतिकर्मचाखिलं किमाश्चर्यंकिमाश्चर्यंकिमाश्चर्यंधनंजय ८१ शांतो
दांतःक्षमाशीलोरामनामार्थचिंतकः तस्यसद्गुणसंख्यानंवक्तुंनैवक्षमोप्यहं ८२ विसृ
ज्यरामनामानिकर्मकुर्वंतियेनराः अप्राप्यसद्गतिंपार्थभ्रमंताकर्मवर्त्मसु ८३ यदृच्छया
पियेरामनामगृह्णंतिसादरं तेपूताःसर्वपापेभ्योरामनामप्रसादतः ८४ येनकेनप्रकारेण
नाममात्रैकजल्पकाः अनायासेनगच्छंतिपरेधाम्निसमादरात् ८५ नामयुक्तान्जनान्दृष्ट्वा

Indira Gandhi National
Centre for the Arts

हनु॰ ।स्निग्धोभवतियोनरः सयातिपरमंस्थानंपरमानंदसागरं ८६ गीत्वाचरामनामानिविचरेद्धीरा
१८ मसन्निधौ इदंब्रवीमितेसत्यंक्रीतोहंतस्यचार्जुनः ८७ गीत्वारामनामानिकरोतिकरतालि
का इदंब्रवीमितेसत्यंतस्यवश्योजगत्पतिः ८८ गीत्वाश्रीरामनामानियेरुदंतिनरोत्तम
तेषामहंपरिक्रीतःपरमेशेनसंयुतः ८९ गीत्वाचरामनामेतिपतंतिभुवियेनराः तेवैधन्या
निधन्याश्चवैस्तवप्रवराःभुवि ९० यदृच्छयानगृण्हंतिरामनामेतिमंगलं अदृश्यतेजना
पार्थदृष्टिमात्रेणावर्जयेत् ९१ निंदंतिरामनामानिरामनामगुणानिच अदृश्यंतेजनापा
र्थदृष्टिमात्रेणावर्जयेत् ९२ भिक्षाशयानगृण्हंतिरामनामपरेश्वरं लोकोपचारनिरता
स्तेवैपाखंडिनोध्रुवं ९३ अर्जुनउवाच भवस्येवंभवस्येवंभवस्येवंमहामते सर्वपापरि १८
व्यापास्तरंतिनामबांधवाः ९४ नमोस्तुनामरूपायनमोस्तुनामजल्पिने नमोस्तुनामसाध्या॰
यवेदवेद्यायशाश्वते ९५ नमोनामप्रपन्नायनमोनामप्रभाविने नमोस्तुनामशुद्धायनमो॰

नाममयायच ९६ श्रीरामनाममाहात्म्यंयःपठेत्श्रद्धयान्वितः सयातिपरमंस्थानंरामनामप्रसाद
तः ९७ रामनामार्थमुत्कृष्टंपवित्रंपावनंपरं येध्यायंतिसदास्नेहात्तेकृतार्थाजगत्त्रये ९८
सोर्पधर्मोत्तरे श्रीमद्रामनाम्नस्तुप्रभावंनिर्मलंमुने जपावेशावशेनैववर्तापतेसज्जनैःक्व॰
चित् ९९ मनोरथप्रदातारंसज्जनानांपरंप्रियं लौकिकीदुर्भगाक्रीडाहंतारंनामसद्युताः
२०० सकृदुच्चरितःशब्दोरामनाम्नाविभूषितः कुरुतेनामैवत्कार्यंसर्वंमोक्षावधिर्नृणां १
परत्वंपरतंमंनाम्नोविदितंसर्वतःश्रुतौ अबुधाःनैवजानंतिसंपतंतिभवार्णवे २ कर्मो
पासनतिज्ञानमनायासेनसिध्यति यदाहिजपतिजिव्हारामनामाखिलेश्वरं ३ काशीखंडेपे
यंपेयंश्रवणपुटकेरामनामाभिरामंध्येयंध्येयंमनसिसिततंतारकंब्रह्मरूपं जल्पन्जल्पन्प्र
कृतविकृतोप्राणिनांकर्णमूलेविथ्यांविथ्यामटतिजटिलःकोपिकाशीनिवाशी ४ यस्मा
मलंप्रियतमंसुयशोविधातागरुडध्वजश्चगिरिजेनितरांतथाहं प्रेम्णावदामिचश्रृणोभिसहे

हनु० वताभ्यांतद्रामसर्वेश्वरमादिदेवं ५ इदमेकंपरंतत्त्वंऽनिर्णीतंब्रह्मवादिभिः नामव्याहरणंप्रभु
१९ इंसर्वकालेषुप्रेमतः ६ केदारखंडेश्रीशंकरवाक्यंपार्वतींप्रति रामनामसमंतत्त्वंनास्ति
वेदांतगोचरं यत्प्रसादात्परांसिद्धिंसंप्राप्तामुनयोऽमला ७ अतःसर्वात्मनारामनामरू
पंस्मरप्रिये अनायासेनभोदेवि अमरात्वंभविष्यसि ८ रामनामप्रभावेन अविनाशीपदं
प्रिये प्राप्तंमयाविशेषेणसर्वेषांदुर्लभंपरं ९ अन्यानियानिनामानि तानिसर्वाऽणिपार्व
ती कार्यार्थेसंभवानीहरामनामादितःखिद्यं १० श्रीरामनामसंस्मृत्य अमरत्वंगतोमुनिः मा
र्कंडेयोपिनैवात्रसंशयस्यप्रयोजनं ११ तथानारदयोगींद्रोभक्तभूपालयापरे मुक्तोभिहाणेव १९
तीर्त्वासंमग्नात्वसुधांवुधौ १२ लंबोदरोपिश्रीरामनाममाहात्म्यमुत्तमं श्रुत्वावधारितंचितेनतः
पूज्योसुरासुरैः १३ एवंश्रीनामसंस्मरणात्ऋषयोदेवतास्तथा मनुष्याःकिंनराःनागाःयक्षवि
द्याधरास्तथा १४ सर्वेकृतार्थाअभवन्तस्मिन्तस्मिन्युगेयुगे नातःपरतरोपायःदृश्यतेश्रूयतेथवा

१५ निर्वाणखंडेशिववाक्यंश्रीरामंप्रति भवन्नामामृतंपीत्वागीत्वाचभवतांयशः शिवोहंसर्वदे
वैश्वपूजनीयःसदाप्रभो १६ निराकारंचसाकारंनिर्गुणंसगुणंविभो उभौविहायसर्वस्वंतवना
मऽस्मराम्यहं १७ महात्मनोनजानंतिवहिरर्थस्पृहायणाः रामनामपरंब्रह्मसर्ववेदांतसंम
त १८ जगत्प्रभुंपरानंदकारणंसदसत्परं रामनामपरेशानंसर्वोपास्यंपरेश्वरं १९ सर्वेषांमं
त्रसाराणांइदमेकंमहन्मतं जानकीजीवनस्याद्यनामउच्चारणंसदा २० कोशलखंडे नतत्पु
राणंनहियत्ररामोयस्योनरामोनहिसंहितासा सनेतिहासोनहियत्ररामोकाव्यंनतस्यान्नहियं
त्ररामः २१ शास्त्रंनतस्यान्नहियत्ररामस्तीर्थंनतद्यत्रनरामचंद्रः कालोप्यकालःकलि
रेवसोस्तिसंकीर्त्यतेयत्रनरामदेवः २२ यागःसआगोनहियत्ररामोयोगःसरोगोनहियं
त्ररामः नसासभायत्रनरामभद्रःविद्याप्यविद्यारहितास्त्यनेन २३ स्थानंभयस्थाननरामकी
र्तिःरामेतिनामामृतशून्यमास्यं सर्पालयंप्रेतगृहंगृहंनद्यत्रार्चितनैवमहेंद्रपूज्यः २४ उक्तेन

Indira Gandhi National
Centre for the Arts

हं॰ तु॰ किंस्याद्दहनात्तुविश्वंसर्वंमुधास्याद्यदिरामशून्यं एतच्चकृत्स्नः पुनराहनोसौस्यश्चोपवीतंजप
२० मालिकांच २५ लघुकोशलखंडे रकारोध्वजवत्प्रोक्तोमकारेछत्रवत्तथा सर्ववर्णशिर
स्थोहिरामइत्युक्तते ऽबुधैः २६ रकारार्थोभवेद्रामःपरमानंदविग्रहः मकारार्थोभवेत्सी
तासच्चिदानंदरूपिणी २२७ इतिश्रीरामप्रतापप्रकाशेप्रमोदनिवासेश्रीयुगलानन्यशरन
संगृहीतेउपपुराणेतिहासखंडनिरूपणंनामद्वितीयप्रमोदः २ अगस्त्यसंहितायां रका
रेरामचंद्रःस्यात्सच्चिदानंदविग्रहः अकारेजानकीप्रोक्तामकारेलक्ष्मणस्वराट् १ रकारे
णवहिर्यातिमकारेणविशेत्पुनः राम रामेतिसच्छब्दोजीवोजपतिसर्वदा २ दैन्यंदौनंतुदुरि
तंपक्षमासर्त्तुवर्षजं सर्वंदहतिनिःशेषंतूलाचलमिवानलः ३ नामसंकीर्तनंचैव गुणानां
मपिकीर्त्तनं भक्त्याश्रीरामचंद्रस्यवचसाशुद्धिरिष्यते ४ विश्वामित्रसंहितायांविश्वामित्रवाक्य
वेश्यंप्रति विश्रुतानिबहून्येवतीर्थानिविविधानिच कोटयंशेनापितुल्यानिनामसंकीर्तनस्य

द्रा ५ धन्याःपुन्याःप्रपऽन्नास्तेभाग्ययुक्ताःकलौयुगे संविहायाथयोगादीन्रामनामैकनिष्ठि
काः ६ ब्रह्मघ्नश्चसुरापश्चस्तेयीचगुरुतल्पगः शरणागतघातीचमित्रविश्रंभकारकः ७
कोटिकोटिसहस्राणिमहापातकजान्यपि सर्वान्यपिप्रणश्यंतिजपत्वाश्रीनाममंगलं ८ सौरसं
हितायां श्रीरामनामनियतंपरिकीर्तनीयंवर्नेहिमोदसंस्थानमशेषसारं जन्मार्जितानिविविधा
न्यपहायदुःखान्यत्यंऽतधर्मनिचयंपरधाममेति ९ जामदग्न्यसंहितायां लब्ध्वापरंपदंतेन
जन्मकोटिभिरर्जितं कीर्तितंयेनमहतारामेत्यक्षरद्वयं १० ज्ञानमध्यात्मशास्त्रंचप्राप्तंजेनामृ
तंमहत् कीर्तितंयेनमहतारामेत्यक्षरद्वयं ११ सर्वमंत्रमयंनामयंत्रास्पदमनुत्तमं स्वाभावि
कीपरासिद्धिर्दुर्लभातज्जपाच्छिवे १२ वृथानानाप्रयोगेषमंत्रतंत्रेषुमानवाः यत्नंकुर्वंत्यहोमू
ढाः त्यक्त्वाश्रीनामसुंदरं १३ यस्यसंस्मरणादेवसर्वार्थाः चक्षुगोचराः भवंत्येवानयासेनतंश्री
राममाश्रये १४ सुतीक्ष्णसंहितायां ससागरांमहींदत्वाशुद्धकांचनपूर्णतां यत्फलंलभतेलोके

Indira Gandhi National
Centre for the Arts

हनु०
२३

नाम्नाकोटिगुणंफलं १५ पुत्रपौत्रैः परिवृतोधनधान्यसमन्वितः सर्वसौख्यमवाप्नोतिरामनामानुकी
र्तनात् १६ वाच्योऽश्रीरामचंद्रस्यवाचकोनामसंस्मृतं वाच्यवाचकसंबंधोनित्यमेवनसंशयः
१७ पावालिसंहितायां रामनामपरंजाप्यंध्येयंगेयंनिरंतरं कीर्तनीयंचबहुधामुमुक्षुभिरहर्निशं
१८ श्रीराऽमनामसामर्थ्यादखिलेष्टंकरतलेस्थितं भवंतिकृतपुण्यानांयथाकल्पतरोर्द्रुतं १९ य
स्यनाम्निरतिर्नास्तिसवैचांडालतोधिकं संभाषणंनकर्तव्यंतस्यंनामनतत्परैः २० रामनामप्रभादि
आयस्योरस्मिविराजते तस्मास्तिस्फलभंसर्वसौख्यंपार्मेश्वदुर्लभं २१ सूतसंहितायां यः श्रीरामपदंन
रः प्रतिपदंसंकीर्तयन्तत्स्मरणान्मुक्तोदुष्कृतराशितोबुधजनैः दृश्योविवस्वत्प्रभः त्यक्त्वासंसृतिमृत्यु
दुःखपटलंसंशुद्धचित्तः पुमान्श्रीरामास्पदमुन्नतंपरपदंप्राप्नोतितंस्तःपरं २२ रामनामामृतंपीत्वाभवे प्रा
न्नित्यंनिरामयं सिद्धांतसारमित्येकंसाधूनांभाविनात्मनां २३ रिपवस्तस्यनश्यंतिनबाधंतेग्रहाः
श्वतं राक्षसानैवखादंतिनरंरामेतिवादिनं २४ अहोधैर्यमहोधैर्यमहोधैर्यःभिदंन्नृणां रामनाम्निस्थि

तेलोकेनभजंतिवहिर्मुखाः २५ सानातनपसंहितायां श्रीरामनामसंकीर्त्यसायुज्यंपरमंप्रभो ज
नानांसुलभंनित्यंदृष्टंसत्यंवदाम्यहं २६ कलौयुगेदेववरस्यनित्यंश्रीरामचंद्रस्यपरंपवित्रं
सतांप्रियंतापनिवारकंचतदेवनामानुदिनंपठध्वं २७ मंगलानिगृहेयस्यसर्वसौख्यानिभांतिच
दिवारश्रौचयेनोक्तेरामेत्यक्षरद्वयं २८ दद्रोवसनेनीरेषट्पदोकंजकानने तथैवरामभक्ता
श्वरामनाम्निरमंतिवै २९ ब्रह्मसंहितायांश्रीशिववाक्यं रामेतिवर्णद्वयमादरेणस्मरेन्त्सवैमु
क्तिमुपैतिजंतुः कलौयुगेकल्मषमानसानामन्यत्रधर्मेखलुनाधिकारः ३० यन्नामकीर्तनफलं
विविधंनिशम्यनश्रद्दधातिमनुतेयदुतार्थवादं समानुषस्तमिहदुःखचयेक्षिपामिसंसारघोर
विविधार्तिनिपीडितांगं ३१ कलिप्रभावतोनष्टाःस्तद्रथानांकयाशुभाः पाखंडैःऽनिर्मितंना
नामतंवादैर्विभूषितं ३२ अतःसर्वपरित्यज्यश्रीरामस्मरणेरताः तएवकृतकृत्याश्चसर्व
वेदार्थकोविदाः ३३ श्रीरामेतिवदन्जीवोयातिब्रह्मसनातनं सर्वाचारविहीनोपितापक्लेशा

Indira Gandhi National
Centre for the Arts

ह नु॰ दिसंयुतः ३४ बौधायनसंहितायांधर्मकथनप्रस्तावेश्रीशुकवाक्यंपिंगलांप्रति दुष्टापूर्त्तोनिऽकर्मा
२२ णिसुबहूनिकृतानिवै भवहेतूनितान्येवरामनाम्नासमुक्तयः ३५ श्रीमद्रामनाम्नस्तुसदास
र्वत्रकीर्तनं नाशौचंकीर्तनेनतस्यपवित्रकरोयतः ३६ रामनामानिलोकेस्मिन्नश्रद्धयापरस्तुकी
र्तयेत् तस्यापराधकोटिस्तुक्षमतेराघवःस्वयं ३७ नतादृशंमहाभागपापंलोकेषुविश्रुतं
यादृशंविप्रशार्दूलरामनाम्नाविदह्यते ३८ श्रीरामनामसामर्थ्यमतुलंविद्यतेद्विज नहिपा
पात्मनस्तावत्पापंकर्तुंक्षमांक्षितौ ३९ तापनीयसंहितायां सर्वेषामेवरोगानांप्रायश्चित्तंपरंस्मृ
तं अपमृत्युप्रशमनं अविद्यायाः विनाशनं ४० स्वप्नेपियोवदेन्नित्यंरामनामपरात्परं सोपि
पातकराशीनांदाहकोभवतिध्रुवं ४१ पापद्रुमकुठारोयंपापेंधनदवानलं पापराशीतमस्तोम २२
रविरुनात्प्रभानिधिः ४२ रामनामपरंधामपवित्रंपावनास्पदं अतःपरंनसन्मंत्रंतारकंविद्यतेक्वचि
त् ४३ हिरण्यगर्भसंहितायांअगस्त्यवाक्यंसुतीक्ष्णंप्रति अभिरामेतियन्नामकीर्तितंविवशान्व

ये तेपिध्वस्ताखिलाघौघाः यांतिरामास्पदंपरं ४४ श्रीरामेतिवदन्ब्रह्मभावमाप्नोत्यसंशयं न
त्वविद्यार्थिनोनित्यंरमंतेचित्सुखात्मनि ४५ इतिरामपदेनासौपरंब्रह्माभिधीयते सर्वसिद्धांतमि
त्याहुस्सर्वेब्रह्मात्मवादिनः ४६ श्रीरामेतिपरंमंत्रंतदेवपरमंपदं तदेवतारकंविद्धिजन्ममृत्यु
भयापहं ४७ अल्पेनैवनाम्नाकथमस्यपापस्ययोभवेदत्रनशंकनीयं तृणादिराशिंदहतेल्प
वन्हिऽस्तथामहामोहमुदारनाम ४८ पुलहसंहितायां बीजोयथास्थितोवृक्षःशाखापल्ल
वसंयुतः तथैवसर्ववेदाश्चरकारेषुव्यवस्थिताः ४९ यथाकरंडेरत्नानिगुप्तान्यंतैर्नदृश्यते त
थैवसर्वमंत्राश्चरामनाम्निसदास्थिताः ५० रकारोच्चारणेनैवबहिर्निर्यातिपातकं पुनःप्रवेश
कालेतुमकारस्तुकपाटवत् ५१ सावित्रीब्रह्मणासार्द्धंलक्ष्मीनारायणेनच शंभुनारामरामे
तिपार्वतीजपतिस्फुटं ५२ रामरामेतिरामेतिस्वपन्जाग्रन्तथानिशि येजपंतिकलौनित्यं
तेनवैश्रीरामरूपिणः ५३ पराशरसंहितायांसांबंप्रतिव्यासवाक्यं नसांबव्याधिजंदुःखंदे

Indira Gandhi National
Centre for the Arts

हनु॰ यंनानौषधैरपि रामनामौषधं पीत्वा व्याधेस्त्यागो न संशयः ५४ कोटिजन्मार्जितं पापमौषधैः शां
२३ तिमेति किं कीर्त्तनीयं रामौरं नाम भवव्याधेर्तदौषधं ५५ सर्वरोगोपशमनं सर्वाधीनां विनाशनं स्म
रत्वं राम रामेति महामोहैकमंदिरं ५६ श्रीरामनामविमुखं जीवं शोधयितुं क्षमः नास्ति प्रायश्चित
मपि कश्चित्सत्यं वचो मम ५७ प्रायश्चित्तेषु सर्वेषु रामनामजपं वरं यतीनां रामभक्तानां सर्वेरी
त्या विशिष्यते ५८ रामनाम्ना परं नास्ति वस्तु ब्रह्मांडगोलके अतः श्रीरामचंद्रं च भजध्वं मंगला
यनं ५९ सनत्कुमारसंहितायां व्यासवाक्यं युधिष्ठिरं प्रति श्रीरामेति परं जाप्यं तारकं ब्रह्मसंज्ञकं
ब्रह्महत्यादिपापघ्नमिति वेदविदो विदुः ६० श्रीराम रामेति जनाः ये जपंति सर्वदा तेषां भुक्तिश्च मु
क्तिश्च भविष्यति न संशयः ६१ ब्रह्महत्यादिपापानि तत्समानि बहूनि च स्वर्णस्तेयसुरापानगुरुतल्पा २३
युतानि च ६२ गोवधाद्युपपापानि अनंतानि संभवानि च सर्वैः प्रमुच्यते पापैः कल्पायुतशतोद्भवैः ६३
मानसं वाचिकं पापं कर्मणा समुपार्जितं श्रीरामस्मरणेनैव तत्क्षणान्नश्यति ध्रुवं ६४ इदं सत्यमिदं

सत्यं सत्यमेतदिहोच्यते रामः सत्यं परं ब्रह्म रामात्किंचिन्न विद्यते ६५ स्कन्दसंहितायां कारणं प्र
णवस्यापि रामनाम महेश्वरं तस्माद्रूपं सदा चिंत्यं यतिभिः शुद्धचेतसैः ६६ प्रमादादपि श्रीरामनाम
दुश्चरितं जनैः भस्मीभवंति पापानि रोगानीव रसायनं ६७ तदेव लग्नं सुदिनं तदेव ताराबलं चंद्र
बलं तदेव विद्याबलं दैवबलं तदेव सीतापते नाम यदा स्मरामि ६८ सर्वाभिलाषपूर्णार्थं जपेन्ना
मपरात्परं सर्वं सत्कामतो याति अवश्यं पदमव्ययं ६९ कात्यायनसंहितायां अर्थवादं परे नास्ति
भावयंतीह यो नरः स पापिष्ठो मनुष्याणां निरये पतति स्फुटं ७० श्रीरामनाममाहात्म्यं यथार्थं श्रुति
संमतं कुतर्केण न कुर्वंति ते धमाः पापयोनयः ७१ राम रामेति रामेति प्रत्यहं वक्ति वै कलौ
नित्यं यत्तायुतयुगपतीर्थकोटिफलं लभेत् ७२ यत्पुत्रः शुचिर्दक्षः पूर्ववयसि धार्मिकः रामनाम
परं नित्यं तं पुत्रं कवयो विदुः ७३ वैश्वानरसंहितायां न देशकालनियमो न शौचाशौचनिर्णयः राम
नाम्नि परे ब्रह्मन् विद्यते कुत्रचिन्नहि ७४ रामेति नित्यं यो भक्त्या ब्रूयाद्रात्रिदिवा नरः महापातकको

Indira Gandhi National
Centre for the Arts

ह०ना० रिभ्योसमुक्तोभवतिध्रुवं ७५ रामनामात्मकंमंत्रंसततंकीर्त्तयंन्नियः सर्वरोगविनिर्मुक्तोमुक्तिमा
२४ प्नोतिदुर्लभां ७६ म्लेछतुल्याकुलीनास्तेयेनभक्ताःरघूत्तमे संकीर्णयोनयःपूताःनामरामाहंति
येसदा ७७ नास्तिनास्तिमहाभागकलेर्युगसमंयुगं स्मरणात्कीर्त्तनाद्यत्रलभतेपरमंपदं ७८ वा
ल्मायनसंहितायां नहिश्रीरामनाम्नाहित्युलभ्यंकिंचिद्देववै क्षिप्रंचफलभंसर्वंसत्यंसत्यंनचानृतं
७९ तुलापुरुषदानानिदत्वायत्फलमश्नुते तस्मादसंख्यगुणितंरामनाम्नाचसंलभेत् ८० स्त्री
राजवालहाचैवयश्चविश्वासघातकः सर्वोपहारीपापिष्ठोमार्गघ्नोग्रामदाहकः ८१ मातृगामीसु
रापश्चभ्रष्टभुक्सर्वनिंदकः मातृहापितृहाचैवब्रह्मणहागुरुतल्पगः ८२ येनेचान्येचपापिष्ठाःम
हापापयताश्चये सर्वैःपापैःप्रमुच्यतेरामनाम्नस्तुकीर्त्तनात् ८३ हेमभारसहस्रेश्चकुरुक्षेत्रे २४
रविग्रहः गजाश्वरथदानैश्चदेवालयप्रतिष्ठिया ८४ सेवनैःक्षेत्रतीर्थानांतपोभिर्विविधैश्च
किं श्रीमद्रामनाम्नस्तुनित्यंयस्यास्तिभूतले ८५ घोरेकलियुगेप्राप्तेसर्वदोषैकभाजने राम

नामरताःजीवास्तेकृतार्थास्तुजीविनः ८६ रामनामपरायेचघोरेऽकलियुगेद्विजाः तएवकृत
कृत्याश्चनकलिर्बाधतेहितान् ८७ समस्तजगदाधारंसर्वेश्वरमऽखंडितं घोरेकलियुगेप्राप्त
रामनामरमंतिये ८८ तेधन्याराजनीयास्तेनास्तितेषांसमंक्वचित् सत्यंवदामिविप्रेन्द्रानान्यथा
थावचनंमम ८९ महाशंभुसंहितायां श्रीरामनामाखिलमंत्रबीजंसंजीविनीचेद्धृदयेप्रविष्ट
हालाहलंवाप्रलपानलंवामृत्योमुखंवाविशतांकुतोभीः ९० तत्रैवश्रीजानकीवाक्यंश्रीरामप्र
ति प्रणवंकेचिदाहुर्वैबीजंश्रेष्ठंतथापरे ततेनामवर्णाभ्यांसिद्धिमाप्नोतिमेमतं ९१ रामेतिना
मप्रभावस्यप्रभावमतिदुर्गमं मृगयंतितुतद्देवाःकुतोनेनामवैभवं ९२ रामनामप्रभावेनस्वयंभूः
सृज्यतेजगत् विभर्त्तिसकलंविष्णुःशिवसंहरतेपुनः ९३ रामऽनाममहामंत्रं मंत्राणांबीज
मुत्तमं येजपंतिजनस्तेचश्रीमद्रामस्यवल्लभाः ९४ पातंजलसंहितायां पृथिवीब्राह्मसंपूर्णांदत्वा
यत्फलमश्नुते रामनामसकृज्जप्त्वातस्माच्छतगुणंफलं ९५ रामेतिनामपरमंमंत्राणांबीजमव्य

Indira Gandhi National
Centre for the Arts

ह०नाः यं येकीर्तयंतिसततंतेषांनास्तिभयंक्वचित् ९६ रामनामपरंब्रह्मत्यक्त्वावात्सल्यसागरं अन्यथाशरणं
२५ नास्तिसत्यंसत्यंवदाम्यहं ९७ नामकीर्तनमेवात्रसंपूर्णफलदायकं अन्यत्फलाफलंसर्वंमोक्षा
वधिमसंशयं ९८ गालवीये सर्वक्लेशयुतोवापिसर्वरोगादिसंयुतः सर्वापराधसंपन्नोरामना
म्नाविशुध्यति ९९ मांगल्यंसर्वपापघ्नमायुष्यंपापनाशनं भुक्तिमुक्तिप्रदंपुण्यंरामनामपरंप्रियं
१०० येहर्निशंजगद्धातुरामनाम्नस्तुकीर्तनं कुर्वंतितान्नरव्याघ्रनकलिर्वाधतेक्वचित् १ स
मापालंजलंवन्हेस्तमसोभास्करोदयात् शांतिःकलेरघौघस्यनामसंकीर्तनात्तदा २ नामसंकी
र्तनंतस्यकृतंटप्रस्खलःनादिषु यःकरोतिमहाभागस्तस्यतुष्यतिराघवः ३ वैशंपायनसंहि
तायां सर्वधर्मवहिर्भूतस्सर्वपापयुतस्तथा मुच्यतेनात्रसंदेहोरामनामानुकीर्तनात् ४ ब्रवी २५
मिवाक्यंश्रुतिशास्त्रसारंश्रृएवंतुतत्सर्वजनाःपवित्रं रामेतिवर्णद्वयमादरेणजपंतुसर्वैर्मुनिभिः
प्रदिष्टं ५ जीवनंरामभक्तस्यवरंपंचदिनानिच नतुनामविहीनस्यकल्पकोटिशतानिच ६ वाराणिधौपतनु

गच्छतुवाहुताशेवंध्याथवाभवतुतज्जननीखरारेः भक्तिर्नयस्यविमलेरघुनाथिशुद्धेजीवनशवो
जगतिगर्हितकर्मकर्ता ७ रामनामजपादेवमहापातककोटयः विनश्यंतिमहाभागद्युनापाले
नतस्संशयात् ८ गार्गीयसंहितायांधर्मवाक्यंहूतान्प्रति हूताश्शृणुध्वंममशासनंमहत्सदैवऽमांग
ल्यसुखावहंसदा ९ स्मरंतियेराघवनामनिर्मलंनतत्रयात्राभवनाशुभावहाः ९ वयंसदानामसु
तद्गुणेरतास्तथैवतेजापकपादसेवकः प्रभावनेत्यस्यहरेश्चब्रह्माविभर्त्तिविश्वंतल्लयंससंभवं १०
तस्मात्समादमुक्तस्त्यक्तरतःकिंकरास्सदा श्रीरामनामसंपन्नेसदनेगमनंनजाऽचिंतुन् ११ कर्तव्यंवा
दस्यमाकर्णयेस्वामिनोममसांप्रतं धार्यसततंप्रयत्नेनमहामोहैकनाशनं १२ वृहद्वशिष्ठसंहितायांवशि
ष्ठवाक्यंनृपंप्रति हित्वासकलपापानिलब्ध्वासुकृतसंचयं संपूतोजायतेधीमान्रामनाम्नस्तुकीर्त
नात् १३ रामरामेतिरामेतिकीर्तयन्मुदचेतसैः राजसूयसहस्राणांफलमाप्नोतिमानवः १४
एकतःसर्वतीर्थानिजलंचैवप्रयागजं श्रीरामनाममाहात्म्यंकलांनार्हंतिषोडशीं १५ अंधानो

Indira Gandhi National
Centre for the Arts

ह०ना० नेत्रमत्वरंलक्षंश्रीनाममंगलं वधिराणांतथाकर्णंपंगूनांहस्तपादकं १६ आश्रयःसर्वजंतूनांमाधा

२९ रोविषयात्मनां जननीजनकवन्नित्यंपोषकंसर्वदेहिनां १७ सुदर्शनसंहितायां चातकानांचको

रणांमयूराणांतथाशुभं लक्षणंदोषनिर्मुक्तंधार्यंश्रीनामनत्परैः १८ दृढधर्मंपरित्यज्यरागद्वे

षादिकंसदा भजेन्निरमयंनामचिंतमाकृष्यसर्वतः १९ श्रीरामनाममात्रायामादौचित्तस्यधार

णां कुर्यात्पश्चात्स्कधीर्ध्यानंरेफस्यैवविवेकतः २० मराबादीनिमंत्राणिरामनाम्निसमभ्यसे

त् गुरोपदेशमार्गेणाविश्वासेनैवसर्वथा २१ एवंरीत्याजपेन्नामतदास्वल्पमुपायतः जायतेप

रमासिद्धिर्विरक्तिर्मुक्तिरुज्वला २२ शिवसंहितायां नारायणादीनिनामासाकारैश्वर्यमुत्तमं नित्यं

ब्रह्मनिराकारमैश्वर्यंतुविभातिच २३ उभयैश्वर्यवान्नित्योरामोदशरथात्मजः तस्यनामपरं

धामपावनंप्रेमकारणं २४ रामनामपरंतत्वद्वयोःकारणमुज्वलं तस्यसंस्मरणादेवसाक्षा

द्रामात्मकोभवेत् २५ नामग्रहणमात्रेणानामीसहमुखतांव्रजेत् तस्मात्श्रीरामनाम्नस्तुकी

र्तनंसर्वदोचितं २६ रामशब्दःपरंब्रह्मवाचकत्वेनबोधितः मकारस्त्वपराशक्तिःसर्वशक्त्या

भिवंदिता २७ लोमेशसंहितायां नमोस्तिप्रत्ययोलोकेयस्माश्रीरामनामतः भिन्नंप्रतीयते

विश्वसत्यंसत्यवदाम्यहं २८ लौकिकाःवैदिकासर्वेशब्दाःश्रीरामनामतः समुद्भवंतिलीयंत

कालेकालेनसंशयं २९ कर्माधीनंजगत्सर्वंविष्णुनानिर्मितंपुरा तत्कर्मकेत्राबाधीनंरामनाम्ना

विनश्यते ३० यथाभुसुंडिशब्देनपलायंतेखगामुने तरुंविहायतद्द्रामनाम्नाद्दुराशयोः ३१

यथाचिंतामणेःसंगाद्दारिद्र्यंयातिसंक्षयं तथाश्रीरामनाम्नावैमोहजालंनसंशयं ३२ पुलस्त्यसं

हितायां नाम्नोरामस्ययेऽतत्वंपरंप्राहुर्कुबुद्धयः राक्षसास्तेचविज्ञेयाःव्रजेयुर्नरकंध्रुवं ३३

रामनाम्नःपरःकिंचित्तत्वंःवेदस्मृतेष्वपि संहितासुपुराणेषुनैवतंत्रेषुविद्यते ३४ रामेतिद्व्य

क्षरंनाममानभंगोपिनाकिनः त्वभेदोवोध्यतेतेनसततंनामनामिनो ३५ कृष्णेतिवासुदेवेति

संतिनामान्यनेकशः तेभ्योरामेतियन्नामप्राहुर्वेदाःपरंमुने ३६ सर्ववेदाश्रयत्वाच्चसर्वलोक

Indira Gandhi National
Centre for the Arts

ह०ना० स्यकारणात् ईश्वरप्रतिपाद्यत्वादखंडब्रह्मवाचकः ३७ शुकसंहितायां आलस्यः हनचेतसांसुम
२७ हतामुच्चाटनं चाहसामां चांडालममूकलोकसुलभो वश्यं च मुक्तिस्त्रियः नो दीक्षा न च दक्षिणा न च
पुरश्चर्यामनागीक्ष्यते मंत्रोयं रसनातफलति श्रीरामनामात्मकः ३८ नायनायमुखतोपि नाष्टकंमो
लितोऽपि न शिवाय पंचकं यस्य राम तव नाम तारकं तत्त्वमन्वयलवात्पदद्वयं ३९ येषां रामप्रियो नैव रामे
न्यूनत्वदर्शिनां द्रष्टव्यं न मुखं तेषां संगतिस्तु कुतस्तरां ४० यन्नामवैभवं श्रुत्वा शंकराच्छुकजन्म
नि साक्षादीश्वरतां प्राप्तः पूजितोहं मुनीश्वरैः ४१ नातः परतमं वस्तु श्रुतिसिद्धांतगोचरे ह्यं सुतं मया
व्यापि सत्यं सत्यं वचो मम ४२ पद्मसंहितायां पठति सकलवेदाः शास्त्रपारंगतो वा यमनियमपरो रामः
वा धर्मशास्त्रार्थदृष्टा अपि नु सकलतीर्थव्राजको वाहिताग्निर्यदि हृदि नहि रामं सर्वमेतद्वृथा स्यात्
४३ रकारात्तापते ब्रह्मा रकाराज्जायते हरिः रकाराज्जायते शंभुः रकारात्सर्वशक्तयः ४४ आदावं
तेतथा मध्ये रकारे पुव्यवस्थितं विश्वं चराचरं सर्वं सावकाशेन नित्यशः ४५ तावदेव मदस्तेषां महा

पातकदंतिनां ४४ आदावंतेतथामध्ये रकारेपुव्यवस्थितं विश्वंचराच
रं सर्वं सावकाशेन नित्यशः ४५ तावदेव मदस्तेषां महापातकदंतिनां यावन्नश्रूयते रामना
मपंचाननध्वनिः ४६ नारायणादीनि नामानि कीर्तितानि बहून्यपि सम्यक् भगवतस्तेषु रामनाम
प्रकाशकः ४७ अनंतसंहितायां वनेचरा मोवसुचाहरामो नदीतुरामो नभयस्म रामः इत्थं व
दंतश्च वने किराताः मुक्तिंगता रामपदानुषंगात् ४८ सर्वैश्वर्यप्रदं सर्वसिद्धिदं सर्वधर्मदं स
र्वमोक्षकरं शुद्धं परमानंदसागरं ४९ एकैकं रामनाम्नस्तु सर्वतापप्रनाशनं सहस्रनाम्नां को
टीनां फलदं वेदविश्रुतं ५० इदं मंत्रमहेशानि जपन्नित्यमहर्निशं मुच्यते सर्वतापेभ्यो रा
मसायुज्यमाप्नुयात् ५१ सर्वेषां सिद्धिदं रामनाम सर्वत्र सर्वदा यस्य संस्मरणाच्छीघ्रं फलमा
यातिदूरगं ५२ मार्कंडेयसंहितायां अंतःकरणसंशुद्धिर्नान्यैः साधनतो मुने कलौ श्रीराम
नाम्नैव सर्वेषां संमतं परं ५३ आर्त्तानां जीवनं नित्यं दृप्तानां च प्रमोददं भक्तानां त्राणक

Indira Gandhi National
Centre for the Arts

ह०ना० तारंराममनाम्नैव [illegible] समाश्रये ५४
२८ कृ रूपादिगुणसंपन्नंसर्वदाशोकहारकं तारकंसंसृतेर्घोरंरामनामभजाम्यहं ५५ चित्तस्यवास
नाम्नसूक्ष्मासर्वानंदविनाशिनी सापिश्रीनामसंलापादनायासेननश्यऽति ५६ रसनासर्पिणी
प्रोक्तासं स्थितावित्लवन्मुखे यानवक्तिसुधासारंरामनामपरात्परं ५७ अत्रिसंहितायां
श्रीशिववाक्यंपार्वतिप्रति येनकेनप्रकारेणसस्मरेद्राघवंशिवे अवश्यंलभतेसिद्धिंप्राप्तिरू
पामनोरमां ५८ श्रीमद्रामनाम्नस्तुनियमंधारणंसदा कर्त्तव्यंसावधानेनत्यक्ताकामादिकं
शिवे ५९ तावन्नियमकर्तव्यंयावच्चित्तंनसंस्मरेत् अनियमाच्चकृतंजाप्यंनिफलंप्रथमंमुने
६० नियमेनैवश्रीरामनाम्निप्रीतिर्ध्रुवास्मृता तस्माद्विपर्ययंत्यक्तानियमंसंचरेद्बुधः ६१ अ २८
होभाग्यमहोभाग्यंकलौनेषांसदाशिवे येषांश्रीरामनाम्नस्तुनियमंनिर्वाणमंडितं ६२ सनक
सनातनसंहितायां अमंप्रषेवकुर्वंतिज्ञानयोगादिसाधने ६३ कथंनभजतेरामंनामपर्मेणपू

जितं ६३ हेरसनेमधुरप्रियेसुमधुरंश्रीरामनामात्मकंपीयूषंपिवप्रेमक्लिन्नमनसाहित्वाविवादान
लं जन्मव्याधिकषायकामशमनंरम्यातिरम्यवरं श्रीगिरिजेशप्रियंसदैवशुभगंसर्वेश्वरंसौख्यदं
६४ नानातर्कवितर्कमोहगहनेक्लिश्यंतियेमानवास्तेषांश्रीरघुवीरनामविमलंसर्वात्मनासौख्यदं
परमानंदपवित्ररंगरमणंसर्वाधिपंसुंदरंदुष्टबोधमयंविचित्ररचनंसर्वोत्तमंशाश्वतं ६५ सर्वेषां
साधनानांवैपरिपाकमिदंमुने यज्जिव्हाग्रेपरंनामजपेन्नित्यमतंद्रितः ६६ श्रीहनुमत्संहितायां
रामत्वत्तोधिकंनामइतिमेनिश्चलामतिः भवतातारितायोध्यानाम्नातुभुवनत्रयं ६७ हेजि
व्हेजानकीजानेर्नाममाधुर्यमंडितं भजस्वसततंप्रेम्णायद्विवांछसिहितंस्वकं ६८ रसनेश्रीना
मसंलापविलंवंकुरुषेकथं व्रीडानायातितेजिव्हेविनाश्रीनामसुंदरं ६९ रामनामात्मकंमं
त्रंयंत्रितंयेनधाऽरितं तस्यक्कापिभयंनास्तिसत्यंसत्यंवदाम्यहं ७० श्रीरामनामसंस्मरणा
त्सीतारामैममोपरि कृपामहेतुलीनित्यंकृत्वासर्वोत्तमांमुने ७१ इतिश्रीरामनामप्रतापप्रकाशे

Indira Gandhi National
Centre for the Arts

 प्रमोदनिवासेश्रीयुगलानन्यसरनसंगृहीतेसौख्यप्रदेसंहितावाक्यप्रमाणनिरूपणंनामतृतीय
 प्रमोदः ३ श्रीहनुमन्नाटके इदंशरीरंशतसंधिजर्जरंपतत्यवश्यंपरिणामदुर्वहं किमौषधं
पृच्छसिमूढदुर्मतेनिरामयंरामरसायनंपिब १ आशीनोवाशयानोवातिष्ठतोयत्रकुत्रवा श्री
रामनामसंस्मरत्ययातिनत्परमंपदं २ येजपंतिसदास्नेहान्नाममांगल्यकारणं श्रीमद्राम
चंद्रस्यकृपालोममस्वामिनः ३ तेषामर्थेसदाविप्रउद्यतोहंप्रयत्नतः ददामिवांछितंनित्यं
सर्वदासौख्यमुत्तमं ४ रामनामैवनामैवसदामज्जीवनंमुने सत्यंवदामिसर्वस्वमिदमेकं
सदामम ५ श्रीजानकीपरिणयनाटके महामणींद्रादपिकाशतेधिकंसदैवरसनाग्रप्रदी
पवल्लं आभ्यंतरंध्वांतम [illegible] शेषमुल्लंघनिवारणेशक्तमहर्निशंभजे 
६ रोमांचितशरीराश्चत्यक्तसर्वदुराग्रहाः रटंतिरामनामाख्यंमंत्रंतेपावनेश्वराः ७ येभिनंदं
तिनामानिरामभद्रस्यनित्यशः मनसावचसासत्यंतेवैभागवतोत्तमाः ८ दृढाभ्यासेनयेनिसंरा

मनाम्निरमंतिच तेषामभयदानाचश्रीरामःसर्वसेविनः ९ विचित्रनाटके प्रभावसोयस्यहिकुं
भजन्माप्रशोषितंसिंधुमपारपारं तथैवऽविंध्याचलरोधितोभुतंमहामुनींद्रेणप्रभाकरेण १०
ननामतः साधनमन्यदस्तिवैनसाध्यसौभाग्यमतःपरंक्वचित् परात्परंप्रेमप्रकाशदंवरंसुधारसंसा
रमनंतवैभवं ११ यद्दक्षिणाच्छंभुसुतोगणाधिपःसुरासुरैःप्राथमिकःप्रपूज्यः प्रदक्षिणायसकृतेस
मस्तासुमावनीस्यात्परतोप्रदक्षिणा १२ साराणांसारमित्याहुर्मुनयःसत्यवादिनः श्रीरामनामस
र्वेशंनित्यानांनित्यमव्ययं १३ सर्वेषांसुलभंनामसदासर्वत्रसौख्यदं येजपंतिसदाभक्त्यातेषांनित्यं
नमोनमः १४ प्रमोदनाटके अनामयंरूपयुगंप्रकाशकंसदैवभक्तार्तिहरंकृपानिधिं स्मरामिश्री
राघवनामनिर्मलंप्रपूजितंदेवमुनींद्रनायकैः १५ नाम्नःपराशक्तियतःप्रभावंविजानतेमर्कट
राऽजराजः यद्रोमकूपेषुध्वनिःप्रशस्ताद्दृष्टाकपीशैरपिदेवसंघैः १६ कषायविक्षेपलयादिहार
कंसुनारकंसंसृतिसागरस्य सदैवआर्तार्तिहरंदयानिधिंस्मरामिभक्त्यागिरिजेशवल्लभं १७

Indira Gandhi National
Centre for the Arts

ह०ना० वंदेश्रीरामचंद्रस्यनाममुक्तिप्रदंपरं यत्कृपालेशतोस्माकंसुलभंसर्वतःसुखं १८ गुणानांकारणं
३० नामतथैश्वर्यमतांसदा संकीर्तनाल्लभेन्मर्त्यः परमव्ययमुज्वलं १९ रहस्यनाटके मधुरम
धुरमेतन्मंगलंमंगलानांसकलनिगमवल्लीयत्फलंचित्स्वरूपं सकृदपि परिगीतंश्रद्धयाहे
लऽयावासभवतिभवपारंरामनामानुभावात् २० चेतोऽलेकमलद्वयंश्रुतिपुटीपीयूषपूरद्वयं
वागीशानयनद्वयंघनतमचंडांशुचंद्रद्वयं छंदःसिंधुमणिद्वयंमुनिमनःकासारहंसद्वयंमो
क्षश्रीश्रवणोत्पलद्वयमिदंरामेतिवर्णद्वयं २१ रामनामपरंब्रह्मदुराराध्यदुरात्मनां साध्यं
चसुलभंनित्यंप्रेमसंपन्नमानसैः २२ श्रुतिस्मृतिपुराणानिभरामनाम्नेवसंततं यथैवलोके ३०
सुस्पष्टंसूत्रेमणिगणाइव २३ स्मरणाद्रामनाम्नस्तुयत्सुखंनलभेन्नरः तत्सुखंस्वगतंपु
ष्पंवंध्या [illegible] पुत्रमिवाद्भुतं २४ प्रेमार्णवनाटके चित्राच्चित्रतरंलोकोहष्टंनकथि
तंमया सार्वभौमस्यरामस्यनामनैवजपत्यहो २५ स्मरणंविहायश्रीरामनामयःपामराधमः

कुरुतेऽन्यवस्तूनांचिंतनंतन्निरर्थकं २६ प्रेमवैऽवि [illegible] त्रनाप्रोक्ताद्दुर्लभासाधनांतरैः साल
भेद्रामनाम्नस्तुजयाच्छीघ्रंनसंशयः २७ इतिश्रीनामप्रतापप्रकाशेप्र० नाटकवाक्यप्र०
मामचतुर्थःप्रमोदः ४ मनुस्मृतौ सप्तकोटिमहामंत्राश्चित्तऽविभ्रामकारकाः एकएवप
रोमंत्रोरामइत्यक्षरद्वयं १ येषांनित्यंरमेचित्तंरामनाम्निसदोज्वले तेषांपुण्ययोघमुत्कृष्ठं
त्रयंप्रतिक्षणमहत् २ दक्षस्मृतौ धन्यामातापिताधन्योधन्याइन्यतमंकुलं यत्रश्रीराम
नाम्नस्तुजापकोजायतेशुचिः ३ विषंतस्यसुधाप्रोक्तंशत्रुस्तस्यसुहृद्भवेत् सर्वेषांप्रेमपा
त्रंसः यस्यनाम्निसदारुचिः ४ धर्मराजस्मृतौ दृष्ट्वाश्रीरामनाम्नस्तुजापकंध्यानतत्परं
अभ्युत्थानंसदास्नेहात्करिष्येहंसदामुने ५ सर्वेधन्यतरोदेशःसाक्षाच्छ्रीरामसन्निभः यत्रति
ष्ठंतिश्रीरामनामसंलापनैष्ठिकाः ६ कात्यायनस्मृतौ मिथ्यावादेदिवास्वापेबहुशोवुनिषेवणे
रामनामास्मरंजप्त्वासद्यःपूतःप्रजायते ७ कृतैश्चक्रीयमाणैश्चभविष्यद्भिश्चपातकैः रामेतिद्व

Indira Gandhi National
Centre for the Arts

ह्०ना० क्षरंनामसकृज्जप्त्वाविमुच्यति ८ आयासस्मरणेकोऽस्यमोक्षंयस्तिष्ठेऽभनं पापस्यपश्चभवति
३३ स्मरतांनदहर्निशं ९ अभिमानंपरित्यज्यचेतसामुद्गगामिना एवंतुरामभद्रस्यनाममाहात्म्य
मुज्ज्वलं १० सांख्यायनस्मृतौ श्रवणात्कीर्त्तनाद्यस्यनरोयातिनिरापदं तच्छ्रीरामनामाख्यंमंत्रं
समाश्रयाम्यहं ११ पापानांशोधकंनित्यंपरानंदस्यबोधकं रोधकंऽचित्तवृत्तीनांभजध्वंरामनाम
कं १२ इममेवपरंमंत्रंब्रह्मरुद्रादिदेवताः ऋषयश्चमहात्मानोमुक्ताजप्त्वाभवांबुधेः १३ हा
रीतस्मृतौ एतंमंत्रं मगस्त्योवैजप्त्वारुद्रत्वमाप्नुयात् ब्रह्मत्वंकाश्यपोजप्त्वाकौशिकोऽमरे
शतां १४ कार्त्तिकेयोमनुश्चैववदंद्वाकेगुरुनायकाः वालखिल्यादिमुनयोदेवतात्वंप्रपेदिरे १५
अद्यापिरुद्रःकाश्यांतुसर्वेषांत्यक्तजीविनां दिशेत्येनन्महामंत्रंतारकंब्रह्मनामकं १६ यस्यश्रवण ३३
मात्रेणसर्वेएवपरंगताः जपितव्यंसदाप्रेम्णातन्मंत्रंरामनामकं १७ विनैवदीक्षांराजेन्द्रपरश्चरणं
विनैवहिं विनैवन्यासविधिनाजपमात्रेणसिद्धिदः १८ वैस्नवस्मृतौ १९ रामनामरताये

चरामनामपरायणाः वर्णावावर्णवात्याद्यावानेकृतार्थाःसदाभुवि १९ स्वपन्भुंजन्व्रजंस्तिष्ठन्नु
त्तिष्ठंश्चव्रजेत्तथा योवक्तिरामनामाख्यंमंत्रंतस्मैनमोनमः २० तस्मात्सर्वात्मनारामनामरू
पंपरंप्रियं मंत्रंजयेत्सदाधीमान्संविहायान्यसाधनान् २१ अत्रिस्मृतौ कवलेकवलेकु
र्वरामनामानुकीर्त्तनं यःकश्चित्पुरुषोश्नातिसोन्नदोषैर्नलिप्यते २२ कवलेकवलेमर्त्योलभे
त्यज्ञादिकंफलं यःस्मरेद्रामनामाख्यंमंत्रराजमनुत्तमं २३ सांवर्त्तकस्मृतौ असंख्यजन्म
सुकृतैर्युक्तोयदिभवेज्जनः तदाश्रीनाम्निसंमंत्रेरतिःसंजायतेनृणां २४ तन्नामस्मरतांलोके
कर्मलोपोभवेद्यदि तत्कर्मसंप्रकुर्वंतितिलिलःकोट्योमहर्षयः २५ अंगिरास्मृतौ कांतारवन
दुर्गेषुविपत्सर्वेषुसंभ्रमे दस्युभिस्संनिरुद्धेचयस्तुश्रीनामकीर्त्तयेत् २६ ननस्यद्योविमुच्ये
द्रामनामप्रभावतः एतादृशंमहास्वच्छंस्वतंत्रंरामनामवैः २७ शनैश्चरस्मृतौ मत्कृताया
भवेद्वाधामहादुःखौघदायिनी रामनामजपात्साहिमुच्यतेस्वल्पकालतः २८ सर्वोपद्रवनाशन

Indira Gandhi National
Centre for the Arts

ह० ना० र्येरामनामजपेद्बुधः सत्यंसत्यंनसंदेहोमंतव्यंसततंजनैः २९ याज्ञवल्क्यस्मृतौ परमात्मानम
३२ व्यक्तंप्रधानपुरुषेश्वरं अनायासेनप्राप्नोतिकृत्वातन्नामकीर्तनं ३० ज्ञानविज्ञानसंपन्नंवैरा
ग्यविषयेष्वनु अमहांप्रीतिमुक्तिद्वांलभतेनामकीर्तनात् ३१ वशिष्ठस्मृतौ रामनामजपे
नैवतद्द्योऽन्नमास्मृता अन्यासामान्यतःप्रोक्तालोकानांहितकारिणी ३२ श्रीरामनामराभे
तियेवदंत्यपिपापिनः पापकोटिसहस्रेभ्योतेषामुद्धरणंसदा ३३ गौतमस्मृतौ तावद्विजंभ
तेपापंब्रह्महत्यापुरःसरं यावच्छ्रीरामनाम्नोऽस्तु नास्तिसंस्मरणंनृणां ३४ मांडव्यस्मृतौ
सुरापोब्रह्महास्तेयीचौरोभग्नव्रतोऽशुचिः स्वाध्यायापार्जितःपापोलुब्धोनैष्कृतिकःशठः ३५ अव्र
तीवृषलीभर्ताकुनखीसोमविक्रयी सोपिमुक्तिमवाप्नोतिरामनामानुकीर्तनात् ३६ बृहस्पति
स्मृतौ यावच्छ्रीरामनाम्नस्तुस्मरणंनास्तिभोमुने तावद्यमभटाःसर्वविचरिष्यंतिनिर्भया ३७
रामनामपरंब्रह्मसर्ववेदैश्वपूजितं सर्वेषांसततंमुद्रंजीवनंचसतांसदा ३८ आतातप

स्मृतौ नित्यंधीक्रयतेरमाभिस्तेषांभाग्येषुनित्यशः नोपीतंरामनामाख्यंपीयूषंमानवास्तु
ते ३९ सूक्ष्ममत्यंतमात्मानं प्र वदंतिविपश्चितः तस्याप्यनुभवस्साक्षाज्जायतेना
मकीर्तनात् ४० ज्ञानानांपरमंज्ञानंध्यानानांपरमोलयं योगानांपरमोयोगःरामनामा
नुकीर्तनं ४१ अयमेवपरोलाभस्सर्वेषांजगतीतले नामव्याहरणंनित्यंश्रीरामस्यस
नातनं ४२ परंब्रह्ममयंनामवेदानागुह्यमुत्तमं यत्प्रसादात्परांशांतिंलभतेपावनोनरः
४३ पराशरस्मृतौ ब्राह्मणःश्वपचीभुंजन्विशेषेणरजस्वलां यदश्नन्सुरयापक्वंमरणेना
मसंस्मरन् ४४ सयातिपरमस्थानंसर्वपापविवर्जितं सत्यंसत्यंपुनःसत्यंरामनामप्रभाव
तः ४५ नद्देहलक्षणंवृक्षंयाथरूपास्तपक्षिणः त्यक्त्वाउड्डीयगच्छंतिविलंवंसंविहायच
४६ क्रतुस्मृतौ तैनास्तिकर्मजंलोकेमानसंवाक्यजंतथा यत्तुनक्षीयतेपापंरामनामेजपा
न्मुने ४७ नतावत्पापमस्तीहयावन्नाम्नाहृतंस्मृतं अतिरेकभयादाहुर्प्रायश्चित्तांतरंबुधाः ४८

Indira Gandhi National
Centre for the Arts

ह०ना० महाभारतेशांतिपर्वणिभगवद्वाक्यं ऋग्वेदेचयजुर्वेदेतथैवाथर्वसामसे पुराणेसोपनिषदेतथैवज्योतिषेर्जुन ४९
३३ सांख्येचयोगशास्त्रेचआयुर्वेदेतथैवच बहूनिममनामानिकीर्तितानिमहर्षिभिः ५० गौणानितत्रनामानि
कर्मजानिचकानिचसर्वेषुतत्वमंत्रेषुरामनामपरात्परं ५१ इतिश्रीनामप्रतापप्रकाशप्र०स्मृ.तिमहाभारतवा
क्यसंग्रहोनामपंचमप्रमोदः ५ शिवरहस्ये सोचंतेतेतपाद्दीनाःस्वभाग्यानिदिनेदिने प्रमादेनाथियेनो
कंरामेत्यक्षरद्वयं १ रामनाम्निसुविज्ञेयाःषण्मात्रातत्वबोधकाः जानंतितत्वनिस्नाताःरामनामप्रसाद
तः २ नारायणरहस्येनारायणवाक्यंनारदंप्रति यथौषधंश्रेष्ठमंमहामुने ज्ञाजतोप्यात्मगुणंप्रकुर्व
नि तथैवश्रीरामपरात्परस्यविवेचनीयंशुभदंसुनाम ३ यथादीपेनधाम्नस्तुतमस्तोमविनाशनं
तथाश्रीरामनाम्नस्तुअविद्यासंनिवर्तते ४ यन्नामकीर्तनोद्दोषास्सर्वेनश्यंतितत्क्षणात् ३३
सद्दानिदोषायनस्मैश्रीरामायनमोनमः ५ श्रीरामेत्युक्तमात्रेणदेहिकोक्लेशनाशनः पा
पौघोविलयंयांतिदानमश्नोत्रियेयथा ६ ब्रह्मरहस्ये नियतंरामनाम्नस्तुकीर्तनात्श्रव^

रणाच्छिवे महतोप्येनसःसत्यमुद्धरेद्राघवेश्वरः ७ तत्रैवनारदवाक्यं सत्यंवदामितेराजन्स्तु
त्वैतदवधारय नामसंकीर्तनादन्योमोचकोत्रनविद्यते ८ सकृदुच्चारयेद्यस्तुरामनामेतिमंगलं हेलयाश्र
द्धयावापिसद्भूतोसर्वपातकैः ९ सर्वाचारविहीनोपिनापक्लेशादिसंयुतः श्रीरामनामसंकीर्त्ययातिब्रह्मस
नातनं १० विष्णुरहस्ये यस्यनामसततंजपंतियेऽज्ञानकर्मकृतबंधनंक्षणात् सद्यएवपरिमुच्यतत्पदंयांतिकोटि
रविभास्वरंशिवं ११ सर्वजातिबहिर्भूतोभुंजानोवाद्गतस्ततः कदाचिन्नारकंदुःखंनामवक्तानपश्यति १२
गणेशरहस्ये श्रीरामनामसंस्मरणेमानसंयस्यवर्तते तस्यवैवश्यतोराजाकरोतिलिपिमार्जनं १३
एकस्मिन्नवतिक्रांतेमुहूर्तेनामवर्जिते दस्युभिर्मोषितस्तेनयुक्तमाक्रंदितंभृशं १४ श्र
न्निरहस्ये रामेतिब्रुवतोऽनिशंभुविजनस्यानावनासंक्षयःपापानामतिशोधकंखलुपुनर्नामैवना
न्यत्कृतं मार्तंडोदयकालमेवतमसोनाशोसतिस्यात्क्रमंकिंकार्यंपुरुषैःप्रदीपकरणंचार्थानभिज्ञैर्य
था १५ अहोमूर्खमहोमूर्खमहोमूर्खमिदंजगत् विद्यमानेपिश्रीरामनाम्निनेवरमंतिच १६

Indira Gandhi National
Centre for the Arts

ह०ना सिद्धांतरस्ये श्रीरामराम रघुवंशकुलावतंसत्वन्नामकीर्तनपराभवतीहवाणी नान्यंवरंरघुप
३४ तेस्वप्नेपियाचेसत्यंवदामिरघुवीरदयानिधेहं १७ तस्मान्मुखेतरःकोपिकोन्यस्तस्माद्वेत
नः यस्यनास्ति पराप्रीतिनाम्निसर्वेश्वरेश्वरे १८ परमानंदजलधौनाम्निसिद्धांतमौलिने
नास्तियस्यरतिर्नित्यासविप्रश्वपचाधम १९ यावन्नेंद्रियवैकुव्यंयावन्नव्याधिर्नबाधते ता
वत्संकीर्तयेद्रामंसहजानंददायकं २० मातृगर्भाद्यदाजीवोविनिःक्रांतस्तदैवहि मृत्युव
क्रागतोवाछंतःस्माद्रामंप्रकीर्तयेत् २१ श्रीनारदपंचरात्रे कदाहंविजनेरण्येनिरंतरमित
स्तनः प्रलपन्रामरामेतिगमिष्यामिचवासरान् २२ यन्नामस्मरतांपुंसांसद्योहरतिपातकं
जायतेचाक्षयंपुण्यंतंवंदेजानकीपतिं २३ श्रीरामनाममणिमालायस्यकंठेसराजतेप्रतिस ३५
णंसतुमुक्तरूपः जन्मादिदुःखसंसारमहार्णवस्यसाक्षात्परंपरतमंप्लवनंपवित्रं २४ अ
यंसर्वेषुमंत्रेषुचूडामणिरुदाहृतः मंत्राणांसिद्धिदोमंत्रःरामेतित्र्यक्षरद्वयं २५ इतिश्रीना

मप्रकाशेप्रमोदनिवासेयुगलानन्यसरनसंगृहीतेरहस्यवचननिरूपणंनामषष्ठःप्रमोदः
६ ब्रह्मयामले रकारःसर्वदेवानांसाक्षात्कालानलप्रभुः रकारःसर्वदेवानांतेजपुंजसना
तनः १ रकारःसर्वभूतानांजीवरूपीपरात्परः रकारःसर्वजीवानांसर्वपापस्यदाहकः २
रकारःसर्वसौख्यानांसिद्धिदस्तुपुरातनः रकारःसर्वविद्यानांवेद्यस्तत्त्वसनातनः ३ रकारःस
र्वसाध्यानांसाधकोनंतरूपधृक् रकारःसर्वभूतानांव्याप्यव्यापकमीश्वरः ४ रकारेस्थितेनित्यंरकारे
लीयतेजगत् रकारेनिर्विकल्पश्चशुद्धबुद्धस्सदाद्वयः ५ रकारःसर्वसिद्धीनांस्मरणाद्दायकोगुरुः
रकारेधर्मकामश्चपरिपूर्णमनोरथः ६ रकारःसर्वसत्त्वानांमहामोक्षप्रदायकः रकाराद्रामचंद्रस्य
सामीप्यंसुखमश्नुते ७ तत्रैवपार्वत्युवाच गुटिकापादुकासिद्धिःपरकायप्रवेशनं वाचासिद्धि
श्चार्थसिद्धिस्तथासिद्धिर्मनोमयी ८ ज्ञानविज्ञानकर्माणिनानासिद्धिकराणिच ल
क्ष्मीकुतहलासिद्धिर्वाछासिद्धिस्तुखेचरी ९ केनेदंसर्वमाप्नोतिदेवमेवदतत्त्वतः सर्वतोनिर्णयंकृत्वा

Indira Gandhi National
Centre for the Arts

ह०ना त्वात्वामामनुगामिनी १० श्रीशिवउवाच सर्वैश्वर्यप्रदंसर्वसिद्धिदंसर्वधर्मदं महामांगलिकंनि
३५ त्यंरामनामपरात्परं ११ नातःपरतरोपायःसुखार्थंवर्ततेप्रिये सत्यंसत्यंपुनःसत्यंनान्यथाव
चनंमम १२ रामनामसदानंदोरामनाऽमसदागतिः रामनामसदातुष्टोरामनामसदामलः
१३ रामनामपरावेदारामनामपरागतिः रामनामपरायज्ञाःरामनामपराक्रिया १४ रामनाम
परंज्ञानंरामनामपरोरसः रामनामपरोमंत्रःरामनामपरोजयः १५ रामनामपरंध्यानंसदास
र्वत्रपूरणं रामनामसदासेव्यःईश्वराणांसदाप्रिये १६ रकारादीनिनामानिश्रृण्वतोममपार्व
ति मनःप्रसन्नतामेतिरामनामानुशंकया १७ रुद्रयामले मकारःसर्वसाध्यानांसर्वसौख्य
प्रदःसदा मकारःसर्वदेवानांसिद्धिदातासदाप्रिये १८ मकारःसर्वजीवानांपालकोजगदीश्व ३५
रः मकारःसर्वसिद्धीनांकारणंनात्रसंशयः १९ मकारोलोकलोकानांमकारःसर्वव्यापकः म
कारःसर्वशास्त्राणांसिद्धांतःसर्वमुक्तिदः २० रकारादीनसिद्धिस्यान्मकारादिविनाशिवे मका

रादीनसिद्धिस्याद्रकारादिविनाशिवे २१ तस्माद्विवेकिभिर्नित्यंजप्तव्यमुभयाक्षरं सिद्धांतसर्ववे
दानांरामऽनामपरात्परं २२ संमोहनतंत्रेशिववाक्यंशिवांप्रति यम्भयोदितमुल्लासमंत्राभूधरा
त्मजे तत्सर्वंरामनाम्नावैसिद्धिमाप्नोतिनिश्चितं २३ सर्वेषांसुप्रयोगानांसिद्धिरन्यत्रदुर्लभा श्रीरा
मनामसंस्मरणादनायासेनसिध्यति २४ तस्माच्छ्रीरामनाम्नस्तुकीर्तनंसर्वसिद्धिदं भजस्वनि
त्यंदेविसत्वान्यान्मंत्रसंचयान् २५ प्राणात्प्रियतरंमत्यंरामनामसदाशिवे स्मरणंहातुंनशक्नो
मिनैवदुर्गेकदाचन २६ रामनामप्रभावेनपंचतत्वात्मकोतनुः सच्चिन्मयंभवेद्देविसत्यंवच्मि
महेश्वरि २७ तंत्रसारे इदमेवपरंसारंसर्वेषांमंत्रसंवृतेः यच्छ्रीरामनामाख्यंपीयूषस्यप्रपीव
नं २८ दुर्लभंसर्वजीवानामयेमंत्रेश्वरेश्वरं कथंभजंतिपापिष्टासुकृतौर्विनाप्रिये २९ मंत्रमहो
दधौ असारतरसंसारसागरोत्तारकारकं व्यसनानांप्रहर्तारंरामेत्यक्षरद्वयं ३० जितंतेनजितंतेन
जितंतेनसुनिश्चितं जिव्हाग्रेवर्ततेयस्यरामेत्यक्षरद्वयं ३१ श्रीरामनामसर्वस्वंमंत्राणांप्रवरंगुरु

Indira Gandhi National
Centre for the Arts

यस्यसंकीर्तनाज्जंतुर्यातिनिर्वाणमुत्तमं ३२ मंत्रप्रकाशे स्तुतंसद्ग्रथशास्त्राणांनिर्णयंवहुधामया
ह०ना० यस्यसंकीर्तनाज्जंतुर्यातिनिर्वाणमुत्तमं ३२ मंत्रप्रकाशे स्तुतंसद्ग्रथशास्त्राणांनिर्णयंवहुधामया
३६ श्रीरामनामसंस्मरणंसारमन्यन्निरर्थकं ३३ ऋग्वेदोथयजुर्वेदस्त्वथर्वणः अधीतास्तेनयेनोक्तं
रामेतिनाममंगलं ३४ नगंगानगयासेतुर्नकाशीनचपुष्करं जिव्हाग्रेवर्त्ततेयस्यरामेत्यक्षरद्वयं ३५
श्रीरामसंत्यक्त्वाऽन्यस्मिन्यस्यसंरुचिः सतुवद्भुतमोलोकेपुनर्यातियातिच ३६ इतिश्रीनामप्रता
नाम पप्रकाशेप्र० तत्राद्विवाक्यप्रमाणनिरूपणंनामसप्तमप्रमोदः ७ भरद्वाजस्तोत्रे रामरामेतिरामेवदंतंवि
कलंभवान् यमदूतैरनाक्रांतंवत्संगौरिवधावत १ स्वच्छंदंचारिणंदीनंरामरामेतिवादिनंतावन्नामतुनि
म्नेनयथावारिवधावतु २ रामत्वंत्वद्दयेयेषांसुखलभ्यंवनेपितैः मंडंचनवनीतंचक्षीरंसर्पिमधूद ३६
कं ३ सीतापतेरामरघूत्तमेतियौनामानिजल्पेयुधितस्मरणात् दिव्यंद्रवंस्तेवयुयुत्सवोपिभियंदधा
नास्हृदयेषुशत्रवः ४ तथाप्रातपंचके प्रातर्वदामिवचसारघुनाथनामवाग्दोषहारिसकलंशमलं
निहंति यत्पार्वतीस्वपतिनासहमोक्षकामप्रीत्यासहस्रहरिनामसमंजजाप ५ रामनामकथयामः

परंसर्वमपहाय सीतानामयुतंयतस्यात्स्यादुपरमसुखाय ६ विरंचिसर्वस्वे श्रीरामनामसंकीर्त
नतः प्रयतांसंसारपारंदुरितौघमुक्तः नरस्तुसत्यंकलिदोषजन्यंपापंनिहत्यासक्रिमत्रचित्रं ७ शि
वसर्वस्वे यावन्नकीर्तयेद्रामंकलिकल्मषनाशनं तावत्तिष्ठतिदेहेस्मिन्भयंसंसारदायकं ८
श्रुतिस्मृतिपुराणेषुरामनामसमीरितं यन्नामकीर्तनेनैवतापत्रयविनाशनं ९ सर्वेषामेवपापा
नांप्रायश्चित्तमिदंस्मृतं नातःपरतरंपुण्यंत्रिषुलोकेषुविद्यते १० नामसंकीर्त्तनादेवतारकंव्रह्म
दृश्यते सत्यंवदामितेदेविनान्यथावचनंमम ११ वैस्रवर्चितामणौ कालोस्तिदानेयज्ञेवास्ना
नेकालोस्तिसंजपे श्रीनामकीर्तनेकालोनास्त्यत्रपृथिवीपते १२ शिवसिद्धांते हिमवद्विंध्ययोर्म
ध्येजनाभागवतामता उच्चारयंतिश्रीरामनामप्राणात्प्रियंमम १३ श्रीरामस्यकृपासिंधोर्नामउच्चा
रणंपरं ओष्ठस्पंदनमात्रेणकीर्त्तनंतुतपोधिकं १४ दृहद्गौतमीये कुष्ठरोगीभवेल्लोकेवहुधाव
लहानरः सकृदुच्चरितंनामश्रीघ्रंनस्पयस्यहो १५ आश्वलायनतंत्रे येकीर्तयंतिनामानिरामस्य

Indira Gandhi National
Centre for the Arts

परमात्मनः सर्वधर्मबहिर्भूत्वा ते यांति परं पदं १६ वैरंच्यतंत्रे पूजयश्वरघूत्तंसं सर्वतंत्रेषु गोपितं गुत्याद्गु
ह०ना० परमात्मनः सर्वधर्मबहिर्भूत्वाते पियांतिपरंपदं १६ वैरंच्यतंत्रे पूजयश्वरघूत्तंससर्वतंत्रेषुगोपितं गुत्याद्गु
३२ त्यतमंनामकीर्तयश्वनिरंतरं १७ मेरुतंत्रे नाम्नांमुख्यतमंनित्यंरामनामप्रकीर्तितं नातःपरतरंनामक्क
चित्संदृश्यतेश्रुतौ १८ नारायणतंत्रे येगृण्हंतिनिरंतरंपरपदंरामेतिवर्णद्वयंतेवैभागवतोत्तमाःसुख
यापूज्यास्तुतेसर्वथा तेनिस्तीर्णभवार्णवंस्कृतकलत्राद्यैस्तनक्रैर्युतंतस्मात्स्वाविशुद्धस्तरंपरतमेसायुमा
यांतिवै १९ वामनतंत्रे पृथिव्यांकतिधालोकानजाताकतिनोमताः मुक्तास्तेत्रनसंदेहो श्रीरामानु
कीर्तकाः २० वशिष्ठतंत्रे रामनामपरायेचरामनामार्थचिंतकाः तेषांपादरजस्पर्शात्पावनंभुवनत्रयं
२१ श्रीरामरसायां पातालभूतलव्योमचारिणःछद्मचारिणः नद्रष्टुमपिशक्तास्तेरक्षितंरामनामभिः
२२ रामेति रामभद्रेतिरामचंद्रेतियास्मरेत् विमुक्तःसनरःपापात्मुक्तिप्राप्नोतिशाश्वति २३ ३२
रामेतिरामभद्रेतिरामचंद्रेतिवास्मरन् नरोनलिप्यतेपापेर्भुक्तिमुक्तिंचविंदति २४ जगज्जैत्रैकमंत्रेण
रामनाम्नैवरक्षितं यःकंठेधारयेतस्यकरस्थाःसर्वसिद्धयः २५ शाश्वततंत्रे वाङ्मनोगोचरातीतःसत्य

लोकेसईश्वरः तस्यनामादिकंसर्वरामनाम्नाप्रकाशते २६ यस्यप्रसादाद्देवेशिममसामर्थ्यमीदृशं सं
हरामिक्षणाद्देवत्रैलोक्यंसचराचरं २७ धातासृजतिभूतानिविष्णुर्धारयतेजगत् तद्रामनामसततंजपं
नित्यंममप्रिये २८ रहस्यसारे रसनायांविशेषेणजप्यंनामसज्जनैः कलौत्वंकीर्तनंदेविसर्वेषासं
मतंशुभं २९ प्रेमसंक्लिन्नयावाचायेरमंतिरठंतिवै नामसर्वेश्वराधारंतेहृतार्थामहामुने ३० नामउ
च्चारणंनित्यंरसनायाप्रशस्यते भक्तानांतुविशेषेणअन्येषामपिसंमतं ३१ यत्रवैगद्यतेनामप्रेमसं
पन्नमानसैः तत्रतत्रपरावाणीनाभिस्थासर्वतःशुभा ३२ रामनामपरंब्रह्म सर्वमोदैकमंदिरं जीव
नेनित्यदिव्यानांपरिकराणांतथाशुभं ३३ आर्यास्तोत्रे रहवसनेरसनेत्वहीनायावज्जरापिशाचि
कया नभवसिभजभजतावत्तनुश्रीरामनामवरं ३४ परिहायर्दंतवसनंजल्पसिरसनेप्रियकिं
चित् तत्किंचितमलज्जेयद्यवजानासिरामवरं ३५ विषयरसाकुलभावंपरिभ्रमययदानिरंतरंरसने
श्रीरामनामजपसित्यागःशोभेतवाऽससोपितदा ३६ रसनेरघुपतिगुणगणंपियूषवापिकायांचेत्

Indira Gandhi National
Centre for the Arts

ह०ना० भवसिनिमग्नैवतदावासोऽन्यासोनहासाय ३७ कोपाद्द्विजवरनिकरैः सद्दनरसनेतवत्यकं प्रीतिंनमुंचसित
३८ थाप्यसदालापेनपापेन ३८ द्विजवरनिकरसमीपेप्यालिंगीताकुलाधमालापं श्रीरामनामकोनेऽहिला
किनलज्जसेरसने ३९ द्विजवरनिकरान्यरितः परगुणनिंदारजोभिते रसने श्रीरामनामनधामसुनला
नैवकिंस्यसत्सि ४० कोनेरघुपतिगुणधामनियन्तनेप्रीतिः द्विजवरसत्यातिजन्मनिरसनेनेयंतवोचिता
रीतिः ४१ परगुणनिंदागुंजाफलमपहारैरतीवपरितुष्टा हरिनाममौक्तिकगुणंरसनेश्रवशवधिक्कुरुषे
४२ लोभज्वरेणजिह्वेपरगुणनिंदादिपितंमनोसि हरिकीर्तनामृतरसंतितक्तमत्वातिरस्कुरुषे ४३ वि
षयाभिलाषतप्तापरगुणनिंदादिधूलिभिर्लिप्ता रसनेनपश्यसिपुरोहरिगुणरूपमब्धे किं ४४ अनुभ
वनीतृप्तिरखिलारसनेरसांतरस्पृहया निरवधितप्तिनिंदानभजरसनेरसालयंनाम ४५ इतिश्रीराम ३८
नामप्रतापप्रकाशेप्र० तंत्ररहस्यस्तोत्रादिवाक्यप्रमाणनिरूपणेनामाऽष्टमोप्रमोदः ८ वाल्मीकीय
रामायणे रामोरामरामइतिप्रजानांसमभूद्ध्वनिः रामभूतमिदंविश्वंरामेराज्यंप्रशासति १ यस्य रामं

नपश्येनमंचरामोनपश्यति निंदिनः सर्वलोकेषुस्वात्माप्येनंविगर्हिते २ क्षणार्द्धेनापियश्चिंतंत्वयिति
हृत्यचंचलं तस्याज्ञानमनर्थानांमूलंनश्यतितत्क्षणात् ३ कूजंतंरामरामेतिमधुरंमधुराक्षरं आ
रुह्यकविताशाखांवंदेवाल्मीककोकिलं ४ सकृदेवप्रपन्नायतवास्मीतिचयाचते अभयंसर्वभूते
भ्योददाम्येतद्व्रतंमम ५ कथंचिदुपकारेणकृतेनैकेनतुष्यति नस्मरत्यपकाराणांशतमप्यात्म
वत्तया ६ ब्रह्मरामायणे धन्यास्तेपावनाः पुण्याः प्रगल्भाः सुखिनोध्रुवाः येभजंतिसदारामनाम
कल्यानसागरं ७ गुणानांनिचयंशुद्धंसर्वानंदप्रदंवरं तंगुरुंसततंमन्येयोभजेन्नामनिर्मलं ८
अध्यात्मरामायणे येषुयेषुचदेशेषुरामनामउपासते दुर्भिक्षदैन्यदोषाश्चनभवंतिकदाचन ९
रामरामेतियेनित्यंपठंऽतिमनुजाभुवि तेषांमृत्युभयादीनिनभवंतिकदाचन १० यस्मिन्रमंतेमुन
योविषयाज्ञानविप्लवे तंगुरुःप्राहरामेतिरमणाद्रामइत्यपि ११ यन्नामविवशोगृण्हन्म्रियमाणः
परंपदं यातिसाक्षात्वमेवासिमुमूर्षोर्मेपुरस्थितः १२ त्वन्नामामृतहीनानांमोक्षः स्वप्नेपिनोभवेत् तस्मा

Indira Gandhi National
Centre for the Arts

ह०ना० च्छ्रीरामनाम्नस्तुसंकीर्तनपरोभव १३ नाधीतवेदशास्त्रोपिनकृताध्वरिकर्मकः योनामवदनात्तेनिस्यंते
३९ नसर्वंकृतंभवेत् १४ मानसरामायणे ब्रह्मांभोधिसमुद्भवंकलिमलप्रध्वंसनंचाव्ययंश्रीमच्छंभुमखें
दुसुंदरवरेसंशोभितंसर्वदा संसारामयभेषजंसुमधुरंश्रीजानऽकीजीवनंधन्यास्तेकृतिनःपिबंतिसततं
श्रीरामनामामृतं १५ भुसुंडिरामायणे श्रीरामनामदीप्ताग्निदग्धदुर्जातिकिल्बिषः श्वपचोपिबुधैःपूज्यो
वेदाढ्योपिचनास्तिकः १६ वेदशास्त्रशतंवापितारयंतिनतंनरं यस्तुरवमनसावाचानकरोतिजं
पंपरं १७ रामनामविहीनस्यजातिऽशास्त्रंजपस्तपः अप्राणस्येवदेहस्यमंडनंतुवृथायथा १८
येस्मरंतिसदाभक्त्यारामनामपरात्परं तेपियांतिपरंधामकिंपुनःजापकोजनः १९ द्विजोवाराक्षसोवा ३९
पिपापीवाधार्मिकोऽपिवा रामरामेतियोवक्तिसमुक्तोभवबंधनात् २० यत्रयत्रसमुद्धारेदृश्यते
श्रुत थवा रामनामम्मेवतत्सर्वंसत्यंसत्यंवचोमम २१ दिवारात्रौचयेनित्यंरामनामजपंतिवैसाक्षात्प
रिकराः दिव्याःपूजनीयाश्चसर्वशः २२ येषांरतिःसदाद्वौपिरकीर्तेनाम्निशाश्वते कदाचि

त्रभविष्यंतितेषांजन्मादिकंमुने २३ असंख्यकोटिलोकानांउपादानंपरात्परं तथैवसर्ववेदानांकारणंना
मउच्यते २४ यन्नामावलंबेनसानुभूतापनीयते अद्यत्वेतुविशेषेणनामिप्राप्तिर्हिनामतः २५ सारदारा
मायणे यत्रास्तितिमिरंघोरंमहादुःखौघसंकुलं तन्मार्गेरामनाम्नस्तुप्रभासंदृश्यतेपरा २६ यस्मिन्देशेन
केप्यस्तिस्वजनस्सवंऽधिनस्तथा नादृशेकूशसंपन्नेनामैकोदुःखहारकः २७ निरालंबपरंनामनिर्विक
ल्पनिरीहकं येरटंतिसदाभक्त्यातेकृतार्थाःसुमुक्तिदाः २८ चतुर्युगेषुश्रीरामनाममाहात्म्यमुज्वलं सर्वो
त्कृष्टनसंदेहोकलौतत्रापिसर्वथा २९ प्रेमरामायणे श्रीराम नामसंलापतत्परंपुरुषंभजेत् मुक्तिस्त
त्सेवनाद्देवि अनायासेनसत्वरं ३० यन्मुखेरामनामास्तिसर्वदा प्रेमतःशिवे दृष्ट्वातद्वदनंपुण्यंसु
गमंशाश्वतंसुख ३१ अहोअभाग्यंखलुपामराणांरामेतिनामामृतमूल्यमास्यं जीवंतिऽतेदेविकथंम
नुष्याःपापात्मनोमूढतमाधिपास्ते ३२ असंख्यकोटिनामानिनैवसाम्यंप्रयांतिच यथाखद्योतराशीनां
रवेस्मादृश्यतामुने ३३ वशिष्ठरामायणे नानातर्कविवादगर्तकुहरेपतिताऽश्चयेजंतवस्तेषामेकमसं

Indira Gandhi National
Centre for the Arts

अयंस्फुरणंश्रीरामनामात्मकं मंत्रंनास्तिअतःपरंसुललितंप्रेमास्पदंपावनंस्वल्पायासफलप्रदानपरमंस
रा० स्वंसदास्वच्छदं ३५ तत्रैवश्रीरामवाक्यं ।यदिवानादिदोषेणमद्भक्तोमांचनस्मरेत् अहंस्मरामितंभक्तंन
४० यामिपरमंपदं ३५ मन्नामोच्चारकंसाधुःसादरंपूजयंतिये तेषांमहंसमुद्धर्तामृत्युसंसारसागरात् ३६
येस्मरंतिसदास्नेहात्ममनामःसुधासरं तेतिधन्याःप्रियास्माकंसत्यंसत्यंब्रवीम्यहं ३७ एतदेवपरंतत्वं
मन्मसन्त्रायनिश्चितं वनसावचसानित्यंभजेन्नाममंगलं ३८ मद्धाक्यमादरेधत्कसमेप्रियतमोनरः
नस्यार्थंसर्वंवस्तूनियावंतिसुधातले ३९ ममनामजपेन्नित्यंयस्तुसंयम्यवाग्मनः नतस्मात्प्रियतमःकश्चित्
ना०नि त्वंस्वंसत्यंमुनेसदा ४० श्रीमहारामायणे मुहुर्मुहुस्त्वेयाप्रोक्तंरामंपरात्परं तदर्थंब्रूहिभोस्वामिन्कृत्वामय्यदयांत ४०
दि ४१ शिवउ० त्वमेवजगतांमध्येधन्याद्धन्यतराप्रिये यत्पृच्छस्यामहातत्वंरामनामार्थमद्भुतं ४२ वेदाःसर्वेतथा
शास्त्राःमुनयोनिर्जरर्षभाः नाम्नःप्रभावमत्युग्रंतेनजानंतिसुव्रते ४३ रामएवाभिजानातिकृत्स्नंनामार्थमद्भुतं
दृषद्दृशामिनामार्थंदेवितस्यानुकंपया ४४ कोटिकंदर्पशोभाढ्यंसर्वाभरणभूषिते रम्यरूपार्णवेरामेरमंतिसनका

द्यः ४५ अतएवरमुक्रीडारामनाम्नःप्रवर्तते रमंतिमुनयःसर्वेनित्यंयस्याङ्घ्रिपंकजे ४६ अनेक
सखिभिःसाकंरमतेरासमंडले अतएवरमुक्तोक्रीडारामनाम्नाप्रवर्तते ४७ वल्लज्ञाननिमग्नोयोजनको
योगिनांवरः हित्वाद्यमनेरामेरमुक्रीडनतोनघे ४८ आबाल्लतोविरक्तोयोजामदग्न्योहरिस्मृतः सएव
रा रमतेरामेरमुक्रीडानतोनघे ४९ सप्तद्वीपाःसर्वेसाधवोसाधवोपिवा विदेहकुलसंभूताःयेचसर्वेनृपो
रमतेरामेरमुक्रीडानतोनघे ४९ सप्तद्वीपाःसर्वेसाधवोसाधवोपिवा विदेहकुलसंभूताःयेचसर्वेनृपो
नमा: ५० चित्रकूटमनुप्राप्यपितुर्वचनगौरवात् रम्यमावश्यंकृत्वारममाणाःवनेत्रयः ५१ दे
वगंधर्वसंकाशामंत्रनेन्यवसन्सुखं अतोस्यरामनाम्नोवैरमुक्रीडाप्रवर्तते ५२ राक्षसीघोररूपाच
दुष्टत्वंकर्तरागता साप्यासीद्दमिनाराममेपतिवत्काममोहिता ५३ चतुर्दशसहस्राश्चराक्षसाखरदूषणाः
मोहितारामसद्रूपेरमक्रीडानउच्यते ५४ नानामुनिगणाःसर्वेदंडकारण्यवासिनः ज्ञानयोगतपोनिष्ठांजा
४ पकाध्यानतत्पराः ५५ मुनिवेषधरंरामंनीलजीमूतसन्निभं रमंतेयोषितीभूत्वारूपंदृष्ट्वामहर्षयः ५६ इ
षद्धास्यकृतोरामःदृष्ट्वातेषामिमांगतिं यूयंधन्यतराःज्ञानंमत्सुसन्नेहिसांप्रतिं ५७ मन्निदेशेनतपोपूर्वंच

Indira Gandhi National
Centre for the Arts

रा० र्ध्वंभोमहर्षय: द्रष्टितास्तेभविष्यंतिद्वापरेवर्त्ततेयुगे ५८ रमितारामम्मूर्त्तौतेस्त्रियोरूपास्तपश्चरन् अ
५१ तोदेविरमुक्रीडारामनाम्नैववर्त्तते ५९ अजरामरतन्तुंत्यक्त्वारामाल्लब्धविलोःकयसः रामएवरमद्रू
लीरमुक्रीडानउच्यते ६० यतोयंरमतेरामेसहैवपवनात्मजः दग्ध्वालंकाननःसीतांवीक्ष्यायातःसु
खेनसः ६१ रमितारामसद्रूपेराक्षसारावणादयः रामरामाहवेत्युक्त्वाराममेवाभिसंगता ६२ परेधाम्नि
गतेरामेयोध्यायांयेचराचरः रामेभिरमिताभूत्वातद्धाकमुपजग्मनुः ६३ रामनाम्नोविशेषेणरमुक्री
डानउच्यते हेतुरन्यत्वरमुक्रीडांश्रणुध्वंसावधाननः ६४ वाच्यवाचकस्तेमस्यकथितोरूपनाम
नी रामनामपरंब्रह्मरमितोयऽश्वरएचरे ६५ रमतेमुनयोयस्मिन्योगिनश्चोर्द्धरेतसः अतोदेविरमु ५१
क्रीडारामनाम्नैव वर्त्तते ६६ योषरांभरणाधारंरामनामजगत्सच अतएवरमुक्रीडापरब्रह्मा
भिधीयते ६७ अध्यांशैःरामनाम्नस्तत्त्रयस्तिद्धभवंतिहि वीजमोकारसोहंचस्वत्रमुक्तमितिश्रुतिं इ
पार्वत्युवाच कथमेतद्विजानामिसंस्तिद्धारामनामतः वीजमोंकारसोहंचस्वामिन्कथयतत्वतः ६९ श्रीशि॰

व उ॰ निश्चलंमानसंकृत्वासावधानश्रणुप्रिये गुह्याद्गुह्यतरंतत्वंवक्ष्येमततमयंमुदा ७० रामनामहा
विद्येषड्भिर्वसुभिराटृतं ब्रह्मजीवमहानादैस्त्रिभिरन्यहृदाभिते ७१ स्वरेणविंडनाचैवदिव्ययामायया
पिच पृथक्तेनविभागेनसांप्रतंश्रणुपार्वति ७२ परंब्रह्ममयोरेफोजीवोकारश्चमश्चयः रस्याकारोम
योनादःएयादीर्घास्वरात्मिकाः ७३ मकारेव्यंजनंविंदुर्हेतुप्रणवमाययो अर्द्धभागादकारस्यादकारान्नाद
रूपिणः ७४ रकारगुरुराकारस्तथावर्णविपर्ययः मकारंव्यंजनंचैवप्रणवंचाभिधीयते ७५ मस्यसव
र्णितंमत्वाप्रणवेनादरूपधृक् अंतर्भतोभवेदेफः प्रणवेसिद्धरूपिणि ७६ रामनाम्नः समुत्पन्नःप्रणवो
मोक्षदायकः रूपंतत्वमऽसिश्चासौवेदतत्वाधिकारिणः ७७ अकारःप्रणवेसत्वमकारश्चरजोगुणः॥
तमोहलमकारःस्यात्लयोहंकारमभ्रवः ७८ चराचरसमुत्पन्नोगुणत्रयविभागतः अतःप्रियेरमुक्रीडाराम॰
नाम्नैववर्त्तते ७९ यथाचप्रणवोज्ञेयोबीजंनदूर्लसंभव सशब्देनहकारेणसोहमक्तंतथैवच ८० इत्यादयो
महामंत्राःवर्त्ततेसप्तकोटयः आत्मातेषाचसर्वेषांरामनाम्नाप्रकाशते ८१ अतःप्रियेरमुक्रीडानेषामर्थे

Indira Gandhi National
Centre for the Arts

मवर्त्तते शनकाद्याः रामनामभजंत्यजः ८२ रामनामगुणोश्च [illegible] र्षेहं संक्षेपेनराम भाषितं रूपमे
रा० वप्रतापं च रामनाम्नो वदामि ते ८३ शृणुष्व परमं गुह्यं यन्न जानंति केपि च केपि केपि विजानंति रामानुक्तो
४२ शेषेव च ८४ तजोरूपमयो रेफः श्रीरामां वककंजऽयी: कोटिसूर्यप्रकाशश्च परं ब्रह्म स उच्यते ८५ सोपिस
र्वेषु भूतेषु सहस्रारे प्रतिष्ठितः सर्वसाक्षी जगद्व्यापी नित्यं ध्यायंति योगिनः ८६ रामोस्य मंडलस्यैव नेजो
रूपं वरानने कोटिकंदर्पशोभाढ्यो रेफाकारो हि विधिश्च ८७ अकारस्तोपि रूपश्च वामदेवस्य कथ्यते मध्या
कारो महोरूपः श्रीरामस्यैव वक्षसः ८८ सोप्यकारो महाविष्णोर्बलं वीर्यस्वरूपकं सर्वेषामेव विश्वानामाधा
रस्त्वं च विद्धि च ८९ मस्याकारो भवद्रूपः श्रीरामः कदिजानुनी सोप्याकारो महाशंभुरुच्यते यो जगद्गुरुः ९०
हस्त्वाभ तश्च रामस्य मकारेयं द्रुनचयत् सा मूलप्रकृतिर्देया महामायास्वरूपिणी ९१ भावितेयं परं मुक्त्वा गुप्यद्रा ४२
हस्ताभ रामस्य अन्यं प्रकीर्तयस्यहं त्वतीहं चारुलोचने ९२ नारायणो रकारस्या रुकारो निर्गुणात्मकः महाम्रे
मोकिरूपकश्च महाल्हादाभिधायिनी ९३ [illegible]

विज्ञानस्योरकारस्यादकारोज्ञानरूपकः मकारः परमात्मा निरमुक्तीडोच्यते ततः ९६ चिद्वाचको रकारस्या
त्सद्वाच्याकार उच्यते मकारानंदकं वाच्यं सच्चिदानंदमव्ययं ९५ रकारस्तत्पदो ज्ञेयस्त्वंपदोकार उच्यते
मकारोसि वक्तृत्वां जानं त्वमसि सुलोचने ९२ ब्रह्मेति तत्पदं विद्धि त्वंपदो जीव निर्मलः ईश्वरोसि पदं प्रोक्तं
ततो माया प्रवर्त्तते ९७ वेदस्यारं महावाक्यं यतत्त्वमसि कथ्यते रामनाम्नश्च तत्त्वार्थं रमुक्तीडाप्रवर्तते
९८ अन्यं प्रकर्ण उक्तत्वतः भक्त्या शृणु वदाम्यहं संक्षेपेणायुक्तेदं स्वराक्षरनिरक्षरैः ९९ व्यंजनाश्च
क्षरोत्पत्तिः रकाराद्ब्रह्मचाक्षरः रेफो निरक्षरो ब्रह्म परमात्मेऽविति श्रुतः १०० स्वरोभिधीयते मायाब्रह्मा
नौ नु चाक्षरः रेफो निनिरक्षरो ब्रह्मसर्वव्यापी निरंजनः १ सकलव्यापिनो नित्यं क्षराक्षरनिरक्षरः रामना
म्निरमुक्तीडाप्रवीणेतः समुच्यते २ रामनामगुणानन्तनो भाषितं देवि सूक्ष्मतः रामनामप्रतापं च सां
प्रतं शृणु सूक्ष्मतः ३ रकारोनलबीजं स्याद्येसर्ववडवादयः कृत्वा मनोमलं सर्वं भस्म कर्मशुभाशुभं ४
अकारो भानुबीजं स्याद्वेदशास्त्रप्रकाशकं नाशवत्येस दीप्तायां विद्यात्हृदये तमः ५ मकारश्चंद्रबीजं च

Indira Gandhi National
Centre for the Arts

रा० सद्स्योपरिपूरणं त्रितापंहरतेनित्यंशीतलत्वंकरोतिच ६ रकारोहेतुर्वैराग्यंपरमंपद्यकथ्यते अकारोज्ञान रा
४३ हेतुश्चमकारोभक्तिहेतुकं ७ अतोदेविरमक्रीडामनाम्नःसमुच्यते सम्यक्शृणुप्रवीणेत्वंहेतुरन्यद्वदामि
ते ८ वेदेव्याकरणेचैववयेचवर्णाःस्वराःस्मृताः रामनाम्नैवतेसर्वेजातानैवात्रसंशयः ९ रकारोमूर्द्धिसंचारस्त्रि
कुट्याकारउच्यते मकारोधरयोर्मध्येलोमेलो-नामेप्रतिष्ठितं १० रकारोयोगिनांध्येयोगच्छंतिपरमंपदं अ
कारोज्ञानिनांध्येयस्तेसर्वेमोक्षरूपिणः ११ पूर्णनाममुदादासाध्यायंत्यचलमानसाः प्राप्नुवंतिपरांभक्ति
श्रीरामस्यसमीपकं १२ अंतर्जयंतियेनामजीवन्मुक्ताभवंतिते तेषांनजायतेभक्तिर्नचरामसमीप॰
नाम काः १३ जिव्हयाप्यंतरेणैवरामंजयंतिये तेचप्रेमपराभक्तानित्यरामसमीपकाः १४ योगिनोज्ञानि
भक्ताःस्वकर्मनिरताश्चये रामनाम्निरताःसर्वेरमुक्रीडानएववै १५ शृणुष्वमुख्यनामानिवक्ष्येभगवतः ४३
प्रिये विष्णुनारायणःकृष्णोवासुदेवोहरिःस्मृतः १६ ब्रह्मविश्वंभरोनंतोविश्वरूपःकलानिधिः कल्प
प्रोदयामूर्त्तिःसर्वगःसर्वसेवितः १७ परमेश्वरनामानिसत्यनेकानिपार्वति एकादेकंमहास्वच्छमश्चाए

न्मोक्षदायकं १८ नाम्नामेवचसर्वेषांरामनामप्रकाशकः ग्रहाणांचयथाभानुःनक्षत्राणांयथाशशी॥
१९ निर्जराणांयथाशक्रोनराणांभूपतिर्यथा यथालोकेषुगोलोकःसरजूर्निम्नगासुच २० कवीनांच
यथानंतोभक्तानामंजनीसुतः शक्तीनांचयथासीतारामोभगवतामपि २१ भूधराणांयथामेरुःस
रसांसागरोयथा कामधेनुर्गवांमध्येधन्वीनांमन्मथोयथा २२ पक्षीणांवैनतेयश्चतीर्थानांपुष्करोय
था अहिंसासर्वधर्माणांसाधुत्वेपिदयायथा २३ मेदिनीक्षमिणांमध्येमणीनांकौस्तुभोयथा ध
नुषांचयथाशार्ङ्गोयज्ञानांनंदकोयथा २४ ज्ञानानांब्रह्मज्ञानंचभक्तीनांप्रेमलक्षणा प्रणवःसर्वमं
त्राणांरुद्राणांमहमेवच २५ कल्पद्रुमश्चवृक्षाणांयथायोध्यापुरीषुच कर्मणांभगवत्कर्म अकार
श्चस्वरेष्वपि २६ किमत्रबहुनोक्तेनसम्यक्भगवतःप्रिये नाम्नांतथाचसर्वेषांरामनामपरंमहान् २७
पार्वत्युवाच नाम्नामेवचसर्वेषांरामनामपरंमहान् भवताकथमिदंप्रोक्तंमेतदर्थंवदप्रभो २८ शिवउ॰
नाम्नामर्थमहंदेविसंक्षेपेणप्रभाषितं नाम्नाभगवतोनेकाःगुणार्थाःकोटिकोटयः २९ अफ्फनारेण

Indira Gandhi National
Centre for the Arts

रा० हंयस्पतेननारायणस्मृतः जीवानामाश्रयोयस्मात्तेननारायणोपिवा ३० सर्वंवसतिवेयस्मिन्सर्वस्मिन्वस
५५ तेपियः तमाहुर्वासुदेवंचयोगिनस्तत्वदर्शिनः ३१ व्यापकोपिहियोनित्यंसर्वेचैवचराचरे विसप्रवेशने
धातुर्विष्णुरित्यभिधीयते ३२ कृषिर्भूवाचकःशब्दोणश्चनिर्वृतिवाचकः हयोरैक्यंमहाविष्णुकृ
ष्णइत्यभिधीयते ३३ कथ्यतेसहरिर्नित्यंभक्तानांक्लेशनाशनः भरणंपोषणंविश्वंविश्वंभरइति
स्मृतः ३४ वायुवद्गगनेपूर्णंजगतांमेववर्त्तते सर्वभिन्नोऽनिराकारंनिर्गुणंब्रह्मउच्यते ३५ य
स्यानंतानिरूपाणियस्यचांतंनविद्यते मुनयोयन्नजानंतिसोप्यनंतोभिधीयते ३६ योविराजस्तुनि
त्यंविश्वरूपमयोच्यते कलावैधिष्ठितासर्वायस्मिन्निनिकलानिधिः ३७ सर्वाण्येतानि नामानिमा
यायोक्तानियानिच सच्चिदानंदरूपाणिनामान्येतानिसर्वशः ३८ परंतुनामभेदश्चसंक्षेपेणवदामिते सच्चिदा ५५
नंदरूपैश्चत्रिभिःपृथक्पृथक् ३९ वर्ततेरामनामेदंसत्यंदृष्टंमहेश्वरि नामान्यन्यान्यनेकानिमयोक्तानिच
पार्वति ४० तेषांमध्येपरंसाक्षाद्रामनामपरात्परं कश्चिदस्मिन्सतेमुख्योचानंदगमनंस्मृतं ४१ त्वमेवमेव-

नामानिविद्धिसर्वाणिपार्वति नामभेदंवदाम्यन्यंप्रवीणेशृणुभक्तितः ४२ अन्यानियानिसर्वाणिनामा
निसाक्षराणिच निर्वर्णंरामनामेदंकेवलंचस्वराधिपं ४३ मकुटंचछत्रंसर्वेषांमकारोरेफव्यंजनं
रामनाममयाःसर्वेनामवर्णाःप्रकीर्तिताः ४४ अतएवरमक्रीडानाम्नामीशःप्रवर्त्तते निजमस्या
नुसारेणरामनामप्रभाषितं ४५ रामनामप्रभावोयंकोपिवक्तुंनशक्यते कोटितीर्थानिदानानिको
टियोगव्रतानिच ४६ कोटियज्ञजपाश्चैवतपसःकोटिकोटयः कोटिज्ञानैश्चविज्ञानैकोटिध्यान
समाधिभिः ४७ सत्यंवदामितेसत्यंरामनामनवर्त्तते परावाण्पाभजेन्नित्यंरनामपरात्परं ४८ त्य
क्त्वामोहंचमात्सर्यंवाक्यंचैवानृतंतथा दम्भंक्रोधकामाद्यांलोभमज्ञानमेवच ४९ रागद्वेषंच
दुःसंगंत्यक्त्वादुर्वासनामपि सर्वेंद्रियजितोभूत्वापूतोवात्यांनरस्तय ५० इत्यंनामजपेन्नित्यंराम
रूपोभवेन्नरः रहरहपठतियोनित्यमेनत्कमललोचने सर्वध्यानफलंतस्यकलांनार्हंतिषोडशी ५१
शठायपरशिष्यायविषयाट्यायमानिने नदातव्यंनदातव्यंश्रीरामोपासकंविना ५२ यदिदातव्यमन्येषां

Indira Gandhi National
Centre for the Arts

रा० सद्यः मृत्युः प्रजायते महतामेवसर्वेषांजीवनंप्रोच्यतेध्रुवं ऽ ५३ इतिश्रीरामनामप्रतापप्रकाशेप्रमोद
५५ निवासेयुगलानन्यसरनसंगृहीतेऽश्रीमद्रामायणप्रमाणनिरूपणनामनवमप्रमोदः ९ श्रुतिराहय
जुर्वेदे मर्त्ताअमर्तस्यतेभूरिनामममनामहेविप्रासोजातवेदसः १ अथर्वणोपनिषदि जपानेनैवदे
वनादर्शनंकरोतिकलौनान्येषाभवति २ ऋग्वेदे सर्वाणिनामानियमाविशंति ३ यस्यनाममह
द्यशः ४ रामेतिनाममुक्तिदोभवति ५ अथर्वणे यश्चांडालोपिरामेतिवाचंवदेतेनसहसंवसेत्ते
नसंभुजीयात् ६ सामवेदे परंब्रह्मज्योतिर्मयंनामउपास्यंमुमुक्षुभिः ७ श्रीरामतापनीये अऽऽ
काराक्षरसंभूतः सौमित्रिर्विश्वभावनः उकाराक्षरसंभूतः शत्रुघ्नःतेजसात्मकः ८ प्रज्ञात्मकस्तु
भरतोमकाराक्षरसंभवः अर्द्धमात्रात्मकोरामः ब्रह्मानंदैकविग्रहः ९ स्वभूर्ज्योतिर्मयोनंतरूपीस्वे ५५
नैवभासते जीवत्वेनेदमोयस्यसृष्टिस्थितिलयस्यच १० ऋग्वेदेच यश्चांडालोपिरामेतिवदे
तेनसहसंवसेत्तेनसहसंभुजीतेति ११ रामतापनीये यथैववटबीजस्थंप्राकृतःश्चमहाद्रुमः॥

तथैवरामबीजस्थंजगदेतच्चराचरं १२ यथानामीवाचकेननाम्निनोभिमुखोऽभवेत्
तथाबीजात्मकोमंत्रोमंत्रिणोभिमुखोभवेत् १३ धर्ममार्गंचरित्रेणज्ञानमार्गंनामतः तथा
ध्यानेनवैराग्यमैश्वर्यंतस्यपूजनात् १४ रामनामभुविख्यातमभिरामेणवापुनः अग्निषोमात्मकंविश्वंराम
बीजेप्रतिष्ठितं १५ रमंतेयोगिनोनंतेसत्यानंदेचिदात्मनि इतिरामपदेनासौपरंब्रह्माभिधीयते १६ रुद्र
स्तारकंब्रह्मव्याचष्टेयेसावमृतीभूत्वामोक्षीभवतीति १७ रामोपनिषदि रामएवपरंब्रह्मरामएवपरं
तपः रामएवपरंतत्वंश्रीरामोब्रह्मतारकं १८ रेफारूढःमूर्तयःस्युःशक्तयस्तिस्रएवचेति २० इतिश्री
रामनामप्रतापप्रकाशेप्रमोदनिवासेश्रीयुगलानन्यसरनसंगृहीतेश्रुतिवाक्यप्रमाणनिरूपणंनामदश
मप्रमोदः १० संपूर्णं श्रीजानकीविनोदविलासे रामस्तुवश्यंभवतीहसीतेतिप्रोच्चारयेत्तुजपंतिसीतां
भूत्वानुगामीभजतेजनस्ताब्रह्मेशशक्रार्चितराजपुत्रः १ श्रीजानकीनवरत्नरत्नमालिकायां सीतांविनाभ
जेद्रामंसीतारामंविनाभजेत् कल्पकोटिसहस्रेषुलभतेनप्रसन्नतां २ ब्रह्मरामायणे येत्वास्मरंति

Indira Gandhi National
Centre for the Arts

रा० सम्द्रक्त्यातेमेप्रियतमाःप्रियं तेषांभाग्योदयंवक्तुंनशक्तोहंकदाचन ३ श्रीसीतारामनाम्नस्तुसहैक्यंना
५६ स्तिसंशयं इतिज्ञात्वाजपेद्यस्तुसधन्योसर्वसाहृदः ४ ज्ञानंसीतानामतुल्यंनकिंचित् ध्यानंसीतानाम
तुल्यंनकिंचित् भक्तिःसीतानामतुल्यंनकिंचित्तत्वंसीतानामतुल्यंनकिंचित् ५ सीतारामंविना
नैवरामःसीतांविनानहिश्रीसीताराम—योरेषसंबंधःशाश्वतोमतः ६ दोहा संमतअंवकनेत्रनि
धिशशिअगहनसोचार तीजिप्रसितरघुराजकोनाममहात्म्यअपार १ संमत् १९ ३५ विक्र
मनामसंवत्सरे श्रावणशुक्लचतुर्थी ४ गुरुवासरतद्दिनेसमाप्त हलासरनाथूरामगौडब्राह्मणवा
स्तव्यश्रीवाराणसीविश्वेश्वरपुरीतन्मध्येलिखितं राजमंदिर।सीतलाघाटनिकट शुभंभवतु॥ ॥ ५६

बालमुकुंद रस्तो

Indira Gandhi National Centre for the Arts

Indira Gandhi National Centre for the Arts